



B. Venkoba Rao

Presented to the Mythic Society Library.

By.

Mrs Saraswati Bai. B Venkoba Rao

Malleswaram

Bangalore

23.2-1937.

Varadambika Parinaya

VARADAMBIKA PARINAYA

BY

TIRUMALAMBA

वरदाम्बिका परिणयम्

श्रीः

शुभमस्तु

अस्ति समस्तजगदानन्दकन्दलं इन्दीवरकुलतपःफलं इन्दिरमणहृदन्तरसत्वपरिणातिः शंकर किरीटक शृङ्गाढकप्राङ्गणोपलाल्यमानशैशवः सलिलराशिलहरी २ लासिकानटनविलासारंभगुंफितकुसुमाञ्जलि समञ्जस किरणमञ्जरीकः निखिलदैवतकुलजीवनकलासारणीसमुदय सुधासास्रकासारः वैसारिणकेतुजीवातुः ओषधिपतिर्नाम

तदन्वयोद्भूतमहीपतीनां
दानांभसामेषतरङ्गमाली ।
अलंकृतोवेत्यवधार्य यस्तं
मुहुः प्रवृद्ध्या मुखरीकरोति ॥

भक्तानजस्रं भवतापतप्तान्
सन्त्रातुकामः सरसैः कटाक्षैः।
निष्यन्दमानामृतशीतलं यं
नालीकनाभो नयनं चकार॥

यस्य खलु सौदर्यतया पशुपाषाणपादपानामप्यश्रान्तविश्राणनपारिणता प्रकृतिचञ्चलाया अपि पञ्चशरजनन्यामुञ्चकेशा भुजान्तरनिरन्तरलालनगौरवं अग्निमान्द्यहेतोरपि अमृतरसस्य आजरामरणत्व समुन्मेषकामिता च निर्मीयते।

यः पुनरुदग्रतरकराक्रान्तपरचक्रः निसर्गविशंकटोदयसमुद्गम निराकृत सकलतेजस्विमण्डलः कुण्ठितेतरकुवलयानन्दकन्दलः निखिलभूभृत्कुलशिरोभागसमुल्लसितपादपल्लवः फुल्ले

तरकुशेशयकोशकाराभवन निवेशितं
मधुरसमलिम्लुचचञ्चरीकसञ्चयोद्य
यातिराजभवनम्

नवग्रहालीनवहारनायको
बभूव तस्माद्बुध इत्युदारधीः।
अमन्दमन्तर्निजबोधमुज्वलं
व्यनक्ति सर्वत्र विभातियैनयः॥
पुत्रस्तदीयो भुवनैकवीरः
पुरूरवानाम भुवं शशास।
येनोर्वशीहारि सुरारिजैत्रा
प्राकाशि नाकेपि भुजप्रतापः॥
जायतेस्म जगतीपतिरस्मा-
दायुरायुरहसो विमतानाम्।
अश्वमेधशतवश्य सुरश्री
रस्य वंशमपुषन्नहुषोपि॥
ययातिरस्यात्मभवो बलारिं

श्रियातिरस्कृत्य चिरं विरेजे।
भयातिरेकक्षुभितस्स यस्मात्
प्रयाति दिक्षु प्रतिपक्षवर्गः॥
तुर्वसुर्नाम तत्सूनुर्निर्वसूकृतशात्रवः।
उर्वरां मणिकेयूरनिर्विशेषमधारयत्॥
अनन्यसामान्यगुणादिसान्द्रः
तदन्ववायार्णवपूर्णचन्द्रः।
कौक्षेयसाक्षीकृतवीरलक्ष्मी-
करग्रहोऽभूद्भुवि तिम्मभूपः॥
पुरा हरिं पुत्रमसूत देवकी-
मुदूह्य कश्चिद्यदुरित्युदारधीः।
स देवकीनाम्नि परिग्रहे शुभे
सुतं प्रसूयैश्वरमत्यशेत तम्॥
विजितपरपुरो वृषाश्रयोऽथ
करगतमेव धनञ्जयं वितृष्वन्।
अवहदनुगतार्थमात्मनाम

स्फुरद्गुरुभूतिरहीनभोगहारि ॥

आर्यां गुणौघैरथ भुक्कमाम्बां
सराजमौलिः विधिनोपयेमे।
नृसिंहनामानमुदग्रशक्तिः
निबर्हितारं सुषुवे कुमारम् ॥

प्रह्लादमानसहितो नरवरान्युदग्र
विक्रान्तिरश्रमकृतोरुहिरण्यदानः।
यस्सिंहसंहननतानुसरञ्जयश्रीः
निष्कण्टकां वसुमतीं निखिलामतानीत् ॥

यः खलु निरर्गलजैत्रयात्रासमुद्धतपटहनिध्वा
नानिभैदित शिखरिगर्भकुहरसुखप्रतिष्ठभु
जगाविष्पकान्दिशीकानेकवैरिवीरलोकः अने
कविधभूजापदानगानरसैकतानविमानचर
सन्तानमानवीणाक्वणविलीनमणिसानुतट
पाषाणनिवहवहमानजलभरोपनीयमानग
गनवाहिनीभयविरतावगाहनरुचिशचीमुख

वरारोहाजनकृत स्वयंग्रहोपगूहन प्रहृष्ट त्रिविष्टप
धिपो निष्ठुरतर पट्टसविघाट्टित दृढतमशारिपुर:
कपाटपट्ट निष्ठ्यूत रुधिभर स्पर्शकुंकुम
पंकसात्विक स्वेद सङ्गरजयरमानीयमान
तदीयराज्यलक्ष्मी समागमांकुरित पुलक
शंकर रत्नाङ्गद मयूख रेखा शृङ्गारित भुजशृङ्गः
तुङ्ग तर तुरङ्ग निरंकुश खर खुर शिखर
टंक सङ्घट्टित विश्वंभरातल विकस्वर पांसु
विसर निश्शेष शोणित सरस्वदन्तर वसति सु
लभ कुलिश धरागम शंकातंक सपत्र गोत्राधि
र वित्रास समुद्गमोद्यय सम समय समुत्पादित
विभिद्यमान शात्रव गात्र स्राव दास्र स्रवन्ती स
हस्र: सन्तत तन्यमान दानधाराम्बु पूरनदी
मातृकायित मेदिनीतलोदार केदार विकीर्ण
विद्वेषण दुर्यश: करीष सविशेष पोषित निज
कीर्त्युन्मेष शालि पालिकायित मनीषि मुखकु

टी निषण्णद्रुहिणयोषा बहुविधोद्घोषणानिशे
षित षनिवारित परोपमानभाषणप्रसङ्गःसा
रङ्गः भयंकरभुजदण्डप्रचण्डमण्डलाग्रकुण्ड
लिवराखण्डशौण्डीर्य....रकुण्ठतराज्ञाचक्रप
रिमण्डलपालित विद्यण्डभाण्डसंभाण्डित
पाण्डुरकीर्तिपूरसुधासारः क्रूरतरप्रचारनि
रवशोषित हारितसर्वदुर्विनीत गर्वसदुर्वारनि
जपौरुषकठोरकरबहुप्रकारकारितवैरिवारि
जमुखीजननयनघनधारालवबाष्पपूरदू
रनिवारित परधरणीपाल विमलयशोजाल
पादसंचारः पारतालप्रविष्टदुष्टरिपुदुराध्मा
मानभूदारादृष्टमूल विस्पष्टतर विजृंभितप्र
तापानलस्तंभशिखर विचयससंभ्रम विम
लकीर्तिकदम्बकादम्ब विलङ्घित ब्रह्माण्डमण्ड
लः निर्वर्तितसमस्तभुवनसौहित्य निरत्यानि
जत्यागनिरुपयुक्त वृत्तवैरिसौरभेयीप्ररनुता

पीन नित्य प्रवर्तमान दुग्धपूरबहुमुख प्रवाहसं
प्रक्रि व्यक्तीकृत दिविषत्तरङ्गिणी क्षीराब्धिम
हिषीत्वमहौचित्यः तीक्ष्णतर प्रक्ष्वेलन विक्षत
विपक्षवक्षो गवाक्ष विनिर्गच्छद सुपवन निवा
रितवीरलक्ष्मी स्वरभसागमनश्रमः दर्वीकर
सार्वभौम धूर्वह भुजशिखर निर्विष्ट सर्वसहः
महां भोराशिगं भीरशयनवासिवासुदेवः सं
चरिष्णुरिव काञ्चनाचलः सकलकलापसम
त सान्द्र इव चन्द्रमाः कल्पितचेतइव कल्पपादपः
पुनरुत्पन्नमूर्तिरिव पुष्पसायकः कृतवीर्य
धुर्य समरविहृतिः अर्जुनकीर्तिसमुज्वलः भी
मनिस्सीमबलोदग्रः विक्रमांकसाहसः वीर
सेनाभिराम विभवः पृथुप्रथितनीतिः धर्मनि
र्मल हृदयः भीष्मदुराप चापचातुर्यः रामाभि
राम रामणीयकः जनकानुकूलशीलः कलानि
धिरिव कमलाश्रयः धर्मभानुरिव निर्मित

शार्वत -- वरासनः कनकाचलइव कलित विबुध
विप्रदाक्षिणः शौरिरिव सदानवध जयोद्यमः
शंकरइव समुन्नत राजताद्रचलस्थितिः नि
दाघसमयइव नित्यसमग्रार्यमाहितः तपोध
नइव नियतशमिताहिवृत्तिः शारदारंभइवअ
सोककान्तरचितरुचिः ऐरावतदन्तमण्डलइ
व अकुण्ठित चतुर श्रीकान्तिः वारिराशिरिव
वाहिनीरतानुगतः विलसत्तरवारिधरोपि
विजृंभितप्रतापः वितरणोज्वलवृत्तिरपिअ
वितरणोज्वलवृत्तिः अजनार्दनोपि अनन्तभो
गाश्रयः सर्वज्ञोपि सत्य रुचिरसराजीत --

सत्येतर रसानाभिज्ञे शक्तित्रयोपयुक्तवृ
त्तियुक्ते षाड्गुण्य प्रयोगयोग्यविचारे निरपाय
चतुरुपायगोपायति यस्मिन् विस्मयनीय
नीतिमतिपरिपालयतिमहीम् - - - - - -

... भङ्गः तरङ्गमालिनि। परार्थाभिलाषः सुक

वित्तशालिनि। सन्मार्गलङ्घनं चन्द्रमसि। विषम
वृत्तक्रमः छन्दसि। पक्षपातः पतङ्गेषु। प्रमत्तता
मातङ्गेषु। समुत्तरलता हारेषु। सदैन्यालापः
प्रणयकुपितदारेषु। बाणपातः शरद्दिवसेषु। अ
तियोगः शरासनेषु। मित्रद्वेषः कुमुदिनीषु
मूर्छना परिवादिनीषु। कार्कश्यं करिकरेषु आरूढ
पतनं अद्रिशिखरनिर्झरेषु। अगम्यातित्वं अनो
कहेषु। अरिकुलाक्रमणं अंभोरुहेषु। शृंखला
बन्धः प्रबन्धेषु। विरोधप्रसङ्गः अलंकारग्रन्थे
षु। प्रथनमुक्तपरिवारिता कृपाणेषु। मार्गणप
राङ्मुखता तृणेषु। परिदूषणछलमायावा
द निग्रहस्थानानि शास्त्रमार्गेषु। कौटिल्य
चाञ्चल्यरागादियोगकाठिन्यशून्यभावाः
कान्ताजनकुन्तलनयनाञ्चलाधरदलकुच
युग्मविलग्नेषु च विरेजिरे —

यस्यप्रतापशिखिविद्रुतकाञ्चनाद्रि-

॥

सान्द्रप्रवाहशतचन्द्रकितः पयोधिः।
मह्याः प्रधानमहिषीपदबाबदूकं
चामीकरांकितमिवाम्बरमाबभासे॥

प्रत्यर्थिक्षितिपाः यदाहवभुवः प्रद्रुत्य भीत्यावनी
कुञ्जेगूढतराः क्षणं श्रमवहन्क्रूरोष्णं निश्वासतः।
शीर्णेऽस्मिन परिशुष्य भूधरदरीभाजः स्वबाम्भुवां
दीप्तिव्यक्तदिशो दृशः पिदधती क्रीडाच्छलात्पाणिभिः॥

अद्वैतशास्त्राधिगमेन सम्यक्
विद्यामिवासाद्य विवृद्धसत्वः।
विद्यापुरीश्वरः स्वधाम्ना
व्यद्योतत व्याप्तजगत्त्रयीकः॥

हरिद्वधूरात्मगुणानुरागिणी-
रनुग्रहीष्यन्नखिलाः करग्रहात्।
प्रहीत्य दूतीमिव कीर्तिमग्रतो
विभुः प्रतस्थे विजयादरच्छलात्॥

आदौ जित्वा हरिहरदिशामात्मसात्कृत्य शक्त्या

तत्रात्युग्रं दिनकरमिव स्थापयित्वा प्रतापम्।
क्षोणीपालः प्रथमजलधेः कूलमार्गेण गत्वा
पारावारान्तर घन चमू पङ्क्तिरागादवाचीम्॥
अथ गच्छन्नेव करटिवदन समाराधन स
मुत्कटादर चटुल वटु कुल चटचटं त्रुटित
भूरि नारिकेल वारिधारा पूरित सारणी संव
र्धित सरस सुकुमार नारङ्ग मातुलङ्ग लवङ्ग
तमाल ताल हिन्ताल रसाल पूग पुन्नाग ना
ग नागकेसर सर्जक भूर्ज खर्जूर चम्पकाशो
क कुरवक तिलक वकुल षण्ड पिचण्डिलारा
म मण्डल मण्डितोपकण्ठान् उद्दण्ड पुण्ड्रे
क्षु काण्ड प्रकाण्ड पर्व निर्विष्ट विमल निस्तल
स्थूल मुक्ताफल कृत कतक शैय मरतक मुद्ग
रारोहावरोह विहाररसायस्त कपोत बालिका
स्तोक निश्वास पर्यस्त वासना लालस रसायु
स्तोम विस्तारित पक्ष निकाय नीलमणिकाय

मान तिरोधीयमान कलमकैदारिकानवलोक
न गगनकृत गतागत मुखर शुकशारिकानि
कान्तकपिशकणिश मञ्जरी विमनापदेश
प्रकाशिताभ्याश विकासिकुशेशयमकर
न्दरम्य निरन्तर निजसौन्दर्य दर्शनकेलि
फलित शालिकेदार निवेदित जातपद सौभा
ग्यलक्ष्मी विनोद कनकवेदिकाबन्धान
सन्ततन्यमान समतन्तु समाहूत पुरुहूतपुरादै
य विरह विधुर शातोदरीव्रात शात संजात रभस
मकरकेतन निश्शेष लून प्रवाल सन्तान स
न्तानक तरुदोहद धूपायमान होमधूमा
भिरामान् उन्मीलित नीलमणिच्छायादायाद
कोमल श्यामलेक्षुच्छविमायातोयधरागमभ्र
म संभ्रम प्रवृत्त नृत्त मयूर विस्तारित वसुमतीवि
लासवती विस्रस्त केशकलापानुकारकलाप
प्रक्षेपणीयान्। द्राक्षालता वितान सवितान

बालरसालमूलच्छायानिषण्णनिष्पन्दगोबृ
न्दवदननिष्यन्दमानरोमन्थबिन्दुसन्दोहस्तृ
ताकरकिताम्बराडम्बरविडम्बनचतुरशा
द्वलप्रदेशान् कलशकल्लोलिनीशजननदु
र्ललितस्वलौकिनैचिकीहल्लभदतुल्याभि
मानशल्यभरणविशल्यकरणीरसायितस
मुल्लदापीनानिशवहमानदुग्धकुल्याशत
दर्शितक्षीरवाराकरसमूहमाहासमाजक
ल्यतरमहोपशल्यान् उल्लासितगन्धवहपुरो
हितप्रेरितक्रमुकवरोदुह्यमानलेलिहानलता
वध्युपरिविकीर्णशेषाक्षतसदृक्षकुहलीकुडरा
ञ्जलीक्षरितकिञ्जल्कनिकरपरिष्कृतनि
ष्कूटचतुष्कान् आविष्कृतजानपदमानवती
जनघनतरोरुपमानबहुमानवर्णनाकर्ण
नावनतमौलिलीलामिलितपरिणतफल
स्तबकानीचमोचावनमेचकरुचिवचितान्

अनुकूल जागरूक विमल कुसुम कोरकरा
जत भाजन विराजि हारिद्र कर्दमकबल
जाल लालनीय परिपाककपिल फलोत्करहा
रि महाराम कुटुम्बि नारङ्ग लता नताङ्गी
समुत्तरङ्गीकृत जनपद सौभाग्य रमायोग्य
तम द्वन्द्व कन्दलदमन्द विवाहमहोत्सवान्
औत्सुक्य कर निजसौभाग्याभिलाषि त्रिवि
ष्टपाभीष्टप्रदानोदस्त वसुमती हस्तोदार
फलित नारिकेल वनप्रशास्तान् अर्यमम
रीचि वीचिका नीच गोचर सन्तत निरन्ध्र
वसुन्धरा रुहान्तर सन्दृश्यमान प्रसूनरजः
सन्दर्शित सरणि स्मरणीय धरणीतरुणी सि
न्दूरित सीमन्त सौन्दर्यान् निरन्तरान्धकारि
त दिगन्त कन्दलदमन्द सुधारस बिन्दु सा
न्द्रतर घनाघन बृन्द सन्दोहकरस्पन्दमानम
करन्द बिन्दु बन्धुरतर माकन्द तरुकुलत

लप मृदुल सिकताजालजटिल मूलतलमरु
वकमिलदल घुल घुलपकलित रमणीयपा
नीयशालिका बालिकाकरारविन्दगलन्तिका
गलगलदेलालवङ्ग पाटल घनसारकस्तू
रिकातिसौरभमेदुर लघुतरमधुर शिशि
रतरसलिलधारा निराकरिष्णु तदीयवि
मललोचनमदुरबापसारित पिपासायास
पथिकलोकान् पाकापकारिलोकातिरि
क्त धरित्री विचित्र सौभाग्यगणनारेखा-
श्लाघनीयजनपद रमाविलास सञ्चरण
पुरोविस्तारित धवलवस्त्रानुकारि सारणी
शत विराजितान् राजीवनिवहापहसित
सहस्राक्षचक्षुर्लक्ष्मीकैः मानससरोवर
सदृक्षैः विमलसलिलरसावधूत सुधा
सारैः कासारैरासादित प्रमोदान् वेदवेदा
न्तविद्या प्रद्युद्योत धीमुषीपदैः दैत्या

रिस्तृति प्रस्ताव विस्तारित हृद्यानवद्यार्थ
विद्योतमान गद्यपद्यैः विश्यारचित सकला
तिथिसत्कारावितथीकृत तिथिभिः सौजन्य
सीमावधिभिः आनितरतत्वज्ञानोपज्ञप्रज्ञैः
निगमागमनिदर्शनायित निर्मल निजक
र्माभिः द्विजमणिभिः अलंकृत महाग्रहा
रान् दूरीकृत दुरित ग्रहनामग्रहण संस्म
रणमात्र प्रतीष्टाभीष्टफलदेवतालयका
लत्रय प्रवृत्त नृत्तारंभ जृंभित मद्दल निध्वा
न पटुपटह तूर्यरवापूर्यमाण हरिदन्तरान्
सन्नत वैमानिकनायकानन्, पदवैभवावलो
कन कुतूहलागत कनक शिखरि शिखर
निकर सरवधान्यराशि प्रकाशित खलप्रदेशा
न् प्रशस्य सकल सस्य संपदाण्डीरभुवः तु
ण्डीरानतीत्य सुत्रामलोक प्रत्यादेशान् अ
त्यादर्णीय रामणीयक निवेशान् चोलदेशा

नयासीत्

त्रैलोक्यसारसमवायसहोपमेया
नालोक्यचोलविषयानवनीमहेन्द्रः।
नाकार्पिणा श्रातमखो नलिनासनेन
शांके बिलोकित इति स्फुटमाशशंके ॥

भृत्येषु पीडयाति यः परकीयबुद्ध्या
देशानिमान् ममत दण्ड्यतमः सजव।
सेनाधिपान् स महीपतिरादिदेश
शौर्यावधारित समस्तजगत्त्रयश्रीः ॥

तोव्रजन्नेव धरे दुरगो
कवेरकन्यां कलयांचकार।
भ्रूभङ्गसंकाश तरङ्गरेखा
स्फुटद्भुगं गोपरिवासरोषम् ॥

अनन्तरं अवनीमहेन्द्रः सान्द्रतरतट महीरुहान्तर निपतदरविन्दबन्धुमयूखदण्डरान्दित पर्यन्तसन्तत परिवर्तमानजला

र्त चक्रानिर्वर्तित बाहिर्विस्तृत बहुविध तल
सार्ध समर्थनीय शतपत्र मुकुलजालविचि
त्रां विनिद्रां भोजराजि व्याज विवर विराजि
त गंभीरता निष्पंन्द नीरपूर विनोदनसा
धन फलकान्त . . . नीलमणि जाल प्र
तिक्षण निक्षेपणोत्क्षेपण विधि लक्षणीय पवन
वशाक्षुभिता वनमद्द्विटप भुज स्वलक्ष्मीको
भय तटक्षोणीरुह श्रेणिकां सतत सलिलव
सति जनित जडिम हरण करण तराणि कि
रण परिचरणपर जलमानवमाणवकारो
हावरोह सन्दित पुरन्दरमणि सोपानपंक्ति
बन्धुर तट द्वन्द्व तरुजाल छायान्तरदन्तु
रितालिक निरन्तरोन्मीलद्दूर्मि सन्ततिम
तरलतरङ्गोत्कर वारिजात समुद्भूत पराग
पालि मिलित तीर तल तरुण तरुशाखाशाय
कुसुममञ्जरी तूर्णविकीर्ण पांसु सन्तति

सन्तत सन्दर्शित वसन्त गन्ध चूर्णमुष्टिविद्राराम समीरण संचरणवशाविनमदुन्नमदायतावनत शाखा पल्लवाञ्चल समुत्क्षिप्यमाण सलिल पृषेत मेदुरित विहग कूजित मुखरीकृत तीरमहीजात जातानुकृत समन्त्रोच्चारण जप्रोक्षण परतन्त्र मुनीन्द्र बृन्दाम। बृन्दारक सरणि सञ्चरणकन्दलदमन्दानन्द मन्दाकिनी महीतलनिपातोदस्त हस्त प्रशस्त समुल्लोलकल्लोलाय उल्लसदधिकानुराजगनिहारगिरिकुमारिकाकान्त पार्श्वद्वय महेश्वर वपुरुपमेयो भयतीर भूरुह छायामेदुरित सविध विमलालवालनीरपूराम। निकट तट विटपि निबिड विटपान्तर निपात कठोर किरण कनक शृंखला सङ्गत तरङ्ग डोला लीलायित लोलजालपाद बालिका पालिका ध्रुवचरण परिणस

परिक्रममाणग्रहताराणानुकरण सलि
लभ्रमिवश परिभ्रमच्चक्र चक्राङ्ग सारसक
रण्डवमण्डलाम्। निमज्जन्नियमवज्जन निश्रे
यस श्रीसमुद्वाह महोत्सव समुचित विचित्र
मङ्गलकलशजाल लालनीय विदल द्धार
विन्द रसास्वादनिमग्नोत्थित परिभ्रमादि
न्दिन्दिर पक्षान्तरानिष्पन्दमान मरन्द
बिन्दु चन्द्रकित सौगन्धिक मुकुल पंक्ति
बन्धुरितां समुत्तुङ्ग भङ्ग महोपधान सङ्ग
त शम्बरप्रवाहवरुण पंकज ग्रहापर्यंक नि
हितवर्तुला बृहदुपबर्हण स्पृहणीय मिहिर
बिम्बजनित सौन्दर्याम् सान्द्रतर शकुनि
कुलकुसुम भरतरल कोमल शैवालजाल
केशपाशादर्शनीय स्रवन्ती कान्त नितान्त
रणित श्रान्ति संवेशपरवश विगीर्ण कुश
कौशेय समुन्नत सैकत नितंब बिंब हंसस्वं

सद मल दुकूल बितान सावधानवीचि भुजा
विराजिताम् अनुकूल निपतत् उदभिपतद
खिल जल विहगकुल गरुद्दर भरित स
लिल पृषित निवासित तटयुगल नियतसल
यित विटपि परिषदाभिवृत जलधर सरणि
परिहासित युगपदुदयद्दुगण कनकागि
रि शिखिर परिगलित सुरनगर तरंगिणीम्
प्रकट विघटमान पुटकिनीकुसुम महाट
क भाजन हरितमधुर रस समासीन राज
हंस विसर रस सह भाजन सतत प्रकाशन
पेशल शौवैः अभ्यास बिलसदाबर्त रभ
स विवर्तमान शतपत्र मुकुल विवर्तक केलीप्र
वर्तक समीरकुमारक विसारित पाश नीका
शारिरवाशतैः आकाशतल विमलताबा
दासह सलिल प्रसाद सन्धान रभस
सन्धान कुतुक विरचित यातायात मेघपृ

थुकोपमान साधित सधिमभिः अभिनव
पद्मिनी परिषदति चपलवीची भुजाविरा
जित राजीवकरतलोत्पतनापतन दर्शनीय
कोलिनीक मणि चुटिकानुकारि चटुला
कारैः रसातलोज्जिहान वाजिनीनाल नि
भव्याल निरालस्य नलिन फणा फलक विल
समान कालिममरीचि भंगि शंकनीयैः पा
थोन्तरगत प्राचेतस निकेत सौध जलवर्त
वातायन कन्दलद मन्द गन्धधूम बन्धुरैः
इन्दिन्दिर सन्दोहैः निरन्तर मुखरित दिग
न्तराय। उदारान्तराल मेलित कुमुद
कुवलय कमल कुड्मल शैवाल जाल शबलि
तावर्त विचित्रतरा रात्रिकपात्र समुल्लसित
हल्लक कोरक दीप कलिकाग्रैः विजयनीरा
जनीमारचय्य निपतदभिनव वटतरु कुसुम
सरस केसर विसर ग्रसन रस सरभस

सारसमुखशकुनिरासितबिलसितैः उपर्युपरि समुद्गच्छदूर्मिघटाभिरपि संमितमन्नैः समागच्छ विजयस्वेति स्मयान्रूपालापपुरस्सरम   हस्तसंज्ञामिव रचयन्तीं पन्नगराजमूर्तिमिव प्रशस्तपावनवृत्तिम् शमिजनचित्तवृत्तिमिव सर्वरसावधीरणामृतरुचिम् शार्वाणीमिव सद्य गिरीश दृढतररसान्धाबाम् बहुलभासितां शैलूषीमिव बहुशास्तरङ्गशोभिताम्। अध्यात्मविद्यामिव उपनिषद्वरपदस्फुटालक्ष्य हंसगतिं प्राज्ञनृपसंपदमिव प्रसाधितदक्षिणाशाम् नीरमालिकामिव नियतो बकुलश्यामलतान्विताम्। पावनतापहसितजह्नुकुमारीं पादोरसावधूत सुधामाधुरीं पयोधिराजप्रधानान्तःपुरीम् पातकवातव्ययमयूरीम् कावेरीमतारीत्

कवेरजायाः कलितोरुभागान

दृष्ट्वा पुरो दक्षिणकूलभागान्।
वरूथिनीं वर्त्मपरिश्रमार्ता-
न्निवेशयामास नृपालसिंहः॥

अथ तत्र समागत्य वर्तमान मानवकुल सुलभावदा
नमैयूत जनाभ्युदशानिदानं आयोधनाग्र निर
वग्रहात्युग्रबलसमग्रं अनतिक्रमणीयपरा
क्रमं अनुक्रमाक्रान्त दिशाचक्रं अतर्कनीय
बृहदुदर्कं निखिलोपक्रमं अशेषजगदीश
कोटीरदेशप्रकाशितनिदेशं अमृताशापूर
कृशांगी जनाङ्गीकृत रमणाशापूरणनिपु
णरणाभिनिवेशमनीशमम्मुं आत्मचारमुखा
दाकर्ण्य निर्णीततन्त्रैः मन्त्रिभिः गौडकालि
ङ्ग त्रिलिङ्गमुखपार्थिवानाम् अत्याहितव्य
ल मावह इवकृत्यमुदाहृत्य प्राभृतार्पण प्रणत्युप
म प्रणामादिकृत्याय प्रार्थ्यमानोपि प्राकृतनृपप्र
त्याख्यायि निजबलप्रत्ययेन तानवमत्य तदात्वफल

सन्नद्धः चोलनृपालकेवलयुद्धाय बद्धादरो बभूव।

विज्ञाय चारवदनाद्व्यवसायमस्य
प्रज्ञावतस्तदनुपार्श्वगतानमात्यान्।
आलोक्य सस्मितमवोचत राजसिंहो
योद्धुं प्रयाम वयमप्युचितं किलेति॥

उषित्वा तत्रैकामुपशिबिर सीमोद्यदमित
प्रदीपज्वालौघप्रकटितदिनश्रीरिह निशाम्।
प्रबुद्ध्य प्रत्यूषे पटुमुखरवैतालिकगिरा
कृतार्हस्वाचारः क्षितिपतिरगारान्निरगमत्॥

प्रस्थानावसरे महीपतिवरान् प्राग्द्वारि बद्धाञ्जलीन्
प्रत्यञ्जल्यन्, कुलवादनयनस्पन्दक्रमैर्मानयन्।
उर्वीमानमयन्ननीक निकरैः उद्दाम भेरीरवैः
द्यामप्युन्नमयन्ततः प्रववृते धीरः सगन्तुं शनैः॥

ततः क्रमेण समेधमान सन्नहन समुद्रेषु, नृसिंहनृ
प सैन्यभटेषु, स्वयमपि अनन्यसामान्य राजन्यस
मुचित जन्यतलजन्य जय धन्यतां आत्मनो मन्य

मानः मन्द सिन्धुर जवन सैन्धव वितिधपा
दातपंक्ति दन्तुरित वसुन्धरा न्तिरतया कन्दलद
मन्द साहसोद्वेलः चोल नृपालः सविशेषरोषः
सरभसमियेष तमाभेषेणयितुम् अथतस्य वि
श्वंभराशुनास्मीरस्य नासीरभुवि केचिदतिम
वनोदस्त भुज विजयध्वजस्तंभ तिर्यगवसि
त मुहुः प्रणर्तित निरस्तकोशपट्टस पताका
स्थगितांबराः पुरमप्रसारितापरकरदृढगृ
हीतान् अनवरत चालितफलकतया प्रतीक्षण
मात्मशौर्या शुशुक्षिणि सन्धुक्षयन्तइव चिरन्त
नाभ्यासफलितानन्त विधायुध शिक्षाविशेष
वैचक्षण्यजनित विशदयशो धान्यराशिम् विशो
धयन्तइवच सन्दर्शनलालसा समेत बृन्दारक
बृन्द विमानान्तरालकन्दलित प्रतिनिनद सन्ता
न कठोतरक्ष्वेलित चोपादित प्रकाशं ५ दशादि
शातट निराकुल पर्यटद्वि विध बिरुदयशो

वाङ्विशेष शेषोवेशानै क्षुर्यदष्ट निजोष्ठपुट वि
स्पष्ट सहज धार्ष्ट्य प्रतिष्ठा सानिशैव: समेध
मान नानायोधन रससाधारण्य समुन्नत वि
शेधरा योधाक्रोधानुरोधात्त्वा धावन—

प्रतीपवात प्रहतांशुकाध्वजा:

प्रचेलुरग्रे प्रसहानुधाविनाम्।

..वनाय प्रथनाद्भयंकरात्

प्रचोदयन्त: केल पाणिचो संज्ञया॥

प्रमद भर प्रकाल्पित परिपत्तय: प्रथने कचिचन रे
जिरे करतलोल्लसिता सिलता: विविध वधूजना
य वियानि परिपालयते वरवरणोत्पल स्रजमिवार्प
यितुं त्वरिता: कुण्डलीकृत कोदण्ड कुडरान्तर्ग
ता भटा:। आदरादमरिभि: प्रागमन्। क्रो
डीकृताण्डव: अत्र नमुचिनिर्मथन नगरनिर्म
लाशुजन निर्मानुकूल निबर निर्माण कार्म
ण रजो गुणोन्मेष समानधर्मणा निखिलान्त्र

वायवीर्य वैर्यवनीपति वर्य निर्मर्यादमदद्
योग तिमिर निर्यातन चातुर्य शौर्यसूर्यो
दय सन्ध्यारागपर्यायेण बाहाबल बहुवि
धोत्साह साहसदोहदोद्दाहल महाम
ह वरसरोरुह किसलय सन्दोह निर्वाहके
ण रणाटोपकोपपाटलिम्ना वीराणामम्बद
नराजीवानि रराजिरे। विजयमानक निध्वा
नश्रवण विवर्धमान सम्मर्द समृद्धि निरगा-
... स्पर्धावकाशैरिव बहिः प्रकाशमानैः स
मुच्चलद्घर्मजल निर्झरसेक सविशेषपोषि
त साहसरसांकुर संकाशैः पुलकजाल
कैरलंकृत निखिलाङ्गः शात्रव दर्शनमात्र
प्रसर भर प्रस्थित रोषपरुष निर्भर्त्सनालाप
त्वरितपदार्पण संमिश्रेणेव कम्पमानाधर
पुटास्फालन डम्बर डंभ संभावनीय भुज
स्तंभ शिखर पेटक राय गंभीर्य शौर्य कुंभी

नस विबोध संभ्रमानिर्णयोन्मेष विस्तारित
नेत्रतया पुरस्तादवष्टब्ध निस्तलारुण फे
नकेन ललाटतटी घटित भ्रुकुटीपटोद्ध
स्तकृपाणिकासमुद्भटेन कोपाटोपेनैव नि
र्भरमखिलान्निर्भेदयन्तः समन्ततो बव
ला रुदग्र समरस साक्रान्त विक्रान्ताः प्रती
क्षणोन्मीलदुत्साह सममद प्रवर्धमान गा
त्रोदञ्चित रोमाञ्चल सूचिकाञ्चलच्छि
द्रितकञ्चुकतया समक्षसमरमुखब द्धवि
ध वैचक्षण्य दिदृक्षु सर्वाङ्गीण जयलक्ष्मी
लवगवाक्षकक्ष्यां अपरोक्षयन्तः सम्पराय
संभ्रम .... समुन्नमित पुल
क धन्य निजकर्णमूल निर्णीत पर राजन्यसै
न्य जयश्रमाभ्य र्थ्यर्णागमनकर्णेजपसन्देश
वर्णावली समाकर्णन रसाः स्वतरं नृत्यदलि
कपार्श्वयुग दृश्यमानोन्मस्तक युद्धकुतूह

लोद्यमाविरौतिमाक्षता भटाः प्रकटीचक्रुः॥
प्रत्यालीढनमत्क्षमातलमिलत्पाताललीनोरग व्राताश्शासि धनुर्धनध्वानैंगलद्विश्वंभरास्सन्धयः। ग्रथ्नन्तश्शारपञ्जरं जयरमाकीरी विहारोचितं धानुष्काः स च मत्क्रियाववलिरैः धैर्यन्तु नैषां क्वाचित्॥
समुन्मिषित सम्भरोत्ताल वैतालिकलोकसमुद्घोषित विविध बिरुदवादमेदुरजयजीवनिस्वनपुरस्सर निस्साणरणित श्रवणसमसमयमेव संमुखीनतया चचाल सकलमपि तद्भयबलम्। ततस्सरभसोद्दस्त निशित सृणि प्रशस्त हस्त सन्नद्ध स्कन्ध पीठ सुस्थित हस्तिपक पदाग्र मुहुस्ताडित श्रोत्रमूलातिमात्र विसृत्वर सत्वर गमन महत्तर पदाग्र समाक्रमणात्युग्रकरोग्रोदस्त मुद्गरजाग्रदाहवाग्रह महामद वेतण्ड मण्डलानवरताहिण्ड

मानचण्डमणि घंटा घणात्करणाकुण्ठतर
कण्ठ गुहावहमान घोषचण्डिम पिचण्डिलः
शालिहोत्रसूत्रविशारद सादिवर पार्ष्णिस्प
र्शमात्रविद्र... शेषवाजिपरिषदकुषहर्षहे
षित घोषविशेषपोषितोन्मेषः चटुल पटुत
र पर्यटन प्रकटिताटोपपादितवसुधातटमहा
भट पेटकरभटोत्समुद्घाटितक्ष्वेलित प्रौढिर
टित परिपाटी समाटीकनन टितकाटवपा
टवः समुद्वेल सैन्यद्वयान्तरसम समयता
ड्यमान भेरीपटहकाहल मद्दलानद्ध ट
क्कासुरज हुडुक्कावेणु मृदङ्गः शृङ्गः पूर्वसर्व
वाद्यनिध्वान भरसमृद्धाडम्बरः सर्वसमय
निर्वर्तित तत्तन्नागीति समुद्धत नृत्त
क्रमाभियुक्त विधूतसकरोत्तंभित परिवर्तमा
न महत्तरडमरु निर्गत्वर डिमडिमध्वनि स
मृद्धि पद्धद्धुनितः वृद्धश्रवः पुरस्सर स्पर्धा

म प्रार्थित पत्रस्याधिप ध्वजकरतलोन्नद्धम
न्थानवसुन्धराधरमथ्यमान दुग्धमहाब्धि
मध्य निबध्यमानसमुद्धत निर्द्ध निर्वैदग्धस
मुद्धरण सिद्धान्त सन्नद्धः सुंभ निसुंभ वि
जृंभमाण संरंभ कुंभिनीधर संभेदनदं
भोलि धारायित भुजस्तंभ शांभवीकरौं
भोरुह समुत्तंभित शार्ङ्ग गंभीर निनद
संभ्रमाहं भाव संभावनाष्टंभ सुभटारंभः
पुराण घोणीवर घोणर घोणामुख विनि
र्गत निर्घानिघृण घर्घघुर्गुरराव महुर्घ
टित दैर्घ्य महार्घः तीक्ष्णतरखर प्रक्ष्वेडन
विक्षोभित हिरण्यकरिपु रक्षोवरवक्षोन्तरवीक्षण
रुक्षं नृहर्यक्षकण्ठगुह्य क्ष्वेलित वैचण्यलक्ष
ण विचक्षणादे वि दिक्षु, क्षोणितले च अन्तरिक्ष
गुणाद्वैतमेव समक्षयन् नक्षीणतया नक्षण
मेव निस्ससार निस्साणराणः। अनन्तर

अनन्तरमरविन्दभवनेनातीतसुधारसगरिमाणम्
इतीरवमधुरिमाणमनाभेनन्धमत्यपरुषाणामारवाणां
आकर्णनायमनागुन्मनायितमाहवपटहजन्मनां
समन्ततो युगपदाक्रन्दन इव हरिदन्तराणि नि
रुन्धन्निव वसुधाधारारन्ध्राणि निश्शेषमाचा
मन्निव विरोचनमरीकाः कुक्षौ निक्षिपन्निव अन्त
रिक्षमुत्तंभयन्निव विश्वंभरावलयं विष्टंभयन्निव पव
न विजृंभणम् सन्ताडयन्निव प्राक्प्रत्यादिस्थानानि
प्रस्थापयन्निव परापराव्यवस्थाम् नीलचोलो नवी
मणिदर्पणस्य कालायसधिष्ण्यं ककुबन्तदन्ति
नां अन्धकारसन्ततिः सुरमत्तकाशिनीनाम् नै
पथ्यविशेषो निर्गत्वरकबन्धनर्तनविधीनां अन्त
र्गृहान्तरं अखिलजन्तूनाम् वज्रपञ्जरं वरंबस्मर
सुभटव्यवसितपताकानाम्। करीषञ्चूर्णराशिः
धनयशःकमलानाम् पङ्गुमिव मूकमिव अन्धमि
व बाधिरमिव स्तब्धमिव बद्धमिव मुद्रितमिव चि

त्रितमिवाखिलं लोकमक्रियाकर्मकिलयन्ननीक

योरुभयोरुदियायरयेण रेणुभरः॥ ——

अन्योन्यप्रतिघान्धकारनिकरैराच्छादिता

- - - - - - - - - - - - - - ——— - - शान्तेः

खड्गाखड्गिभवस्फुलिङ्गकलिकाखद्योतितद्योतले।

रुन्मीलद्घटचक्षुरुत्पलवने युद्धत्रियामाभरे।

- -

पुंजं तमोमयमपि स्फुटयन्स्वयन्नात्

स्यंनद्रदाकस्यमया किलपांसुराशेः।

- - - - - - - - - - - - - - - -

- - - - - - - - - - - - - - - -

सख्याश्चर्य दिदृक्षयेव हरितः सर्वास्समेत्यामिलन्

वीरोद्वाहवलत्सुरीततातिभरा द्योमव्यनंसीदिव।

द्यामालिंगितुमुद्यतया विव मुदा धात्रीखलापतनात्

*धौरोमेद्य गमिष्यतीति परितः पांसूत्करैः जृंभितै।

संग्रामांकणसंचरन्नजयरमा सान्निध्य धूमोद्गमः
कीर्तिः श्वेतगरुद्विहारविपिनं कीलालवर्षाम्बुदः।
स्वस्त्रीवीरविवाहसाक्षिसुमहाशौर्याग्निधूमच्छटा
संचक्राम ततः क्रमेण हरितां चक्रं रजः कन्दली ॥

नागा नागान्नैकगर्जातिरेकैः
अश्वानश्वा हर्षहेषाप्रकर्षैः।
योधा योधान्युक्तभाषाविशेषैः
प्रौढे रेणौ प्राहरन् स्वापरज्ञाः ॥

परस्परविविधायुध प्रहारपात्यमान सुभटगात्र कन्दलितापरितः प्रवहन्ती रुधिरस्रवन्ती नवपवनवशोद्भूत परागोत्कर परीततया परिणमदन्धकार निबन्धिनीनामन्धपन्थानमरुन्धत्साध्युरुचाम्

नासीद्वीरतरवारि विदारि
धाराल घोर रुधिरैर्घनतरंगिणीभिः।
दृष्टाद्विपेन्द्रकरशीकरसान्द्र दान-

पाथोभैरैरपि परागपरङ्गशाम्य ॥

समुद्धत सुभटव्रात परस्पराभिपात समय समुदि
तक्ष्वेलित रटित द्रुतमुरव समाहूत पुरुहूतपुर
शातोदरीजात लीलायित जातविविध विलोकि
त विद्योतासिता परिवीतोद्धृतकृपाण लता
दीधिति तोरणस्तंभ शातसूचित प्राति निवादि
तेय थावोचितमाकान्तरनिर्माणोद्यमम्
अन्धीकृत हरिदन्तराल रजोन्धकार निकरस्य
द्योतनातमान विद्योतमान वाल्गित खड्ग निरर्गल
खड्गा खड्गि पुङ्खानुपुङ्खि तराङ्गित स्फुलिङ्ग दु
र्लङ्घ्य प्रताप शिखि भयंकरम् सोमाधिक
धामालोकन सामानिक वैमानिक वामालकवि
मुक्त कल्पद्रुम पुष्पस्तबक निष्पातित पुष्पन्ध
य पक्षपतन तत्क्षण कृत सन्ध्युक्षणको पाशुशुक्षणि
दुर्लक्ष साध्वु धानुष्क कर परिष्क्रियमाण यित

चापचक्रनिर्गत्वर विशिख निचयखचितांग
वीरवर्गसमुद्घाटित दुर्ललित शल्यमृत सकु
ल्लसनं प्रचण्डमदकण्डूल भुजदण्डवीरप्रका
ण्डकरतलाहिण्डित मण्डलाग्रखण्डित विमत
षण्ड भेदित मार्तण्ड मण्डल साक्षात्कृतान्तरिक्ष
सौधतलोपस्थ सहस्राक्ष सरसिजाक्षी रणनिरीक्षण
कनकगवाक्षवैचण्यं अक्षीण विजयलक्ष्मीपण
जिघृक्षया लक्षित लगुडाक्ष विक्षेपैः नृपतिलक्षैः
परस्परमूरीकृतयोध णपातकौतुकम कबन्ध
नर्तनानुकूल पालित नरकपालयुगल तालरवो
त्ताल वेताल बहल हल हलिका कलकल परिहृत
रोदनभूत राजबालकम सरसतर रसास्वाद गा
र्दन गृध्र मिथुन चञ्चल चञ्चु सन्दंशिकाञ्चल
समुद्धृतान्त्र मालिकाजाल लम्बमान मानवकले
बर तनुतरडोलामञ्चकान्तरालाधिरोपितबा
लकोपलालन लीलालकालोलिकालालनगाना

कर्णनरसावमान रुधिरपानावधान यातुधानम्
अकृष्ट गरिष्ठ वैतण्डमण्डल शुण्डापलाभिः अं
हिण्डित पाण्डरछत्र पुण्डरीकमण्डलाभिः नि
पातित चर्म वितति निर्मित कूर्मसाधर्म्याभिः
विश्रष्ट पदृसारित्र हस्त रात्रिंचरकुमारकेलि
चाल्यमानानेकपगात्र पानगात्राभिः अति
तुमुल कलकल बहलित रतरल हरिवेगाभिः अ
सृभ्रयीभिः अनवरतसमेध्यमानावरोध महा
योधयशःपयोधिवरं कान्तारमिव खड्गिकुल
परिवृतम् अमरोद्यानमिवाविष्कृतकल्पागमा
टोपम् अतलमिवानन्तबलिशोभितम् पयोधि
सलिलमिव प्रकटित भङ्गोदयम् वसन्तदिनमि
व वितीर्ण सुकरवीर सौमनस्यम् वर्षागममि
व वर्धिताप्सरःशरोवरलाभम् स्वयंवरभवनाङ्ग
णं सुराङ्गनानाम् सुकृत परिणामः शूराणाम्
आहारमण्डपं अनीहारकरकुमारमण्टपस्य।

क्रीडाभवनं कीर्तिलतिकानाम् जननसदनं ज
येन्दिरायाः निकषाशिला पौरुषकनकस्य
दुर्मदपदसंहरणोपबृंहित सिंहनाद भंगि
त रौद्रसी शृङ्गाटकम् अतिभयंकरम् सङ्गा
रमभूत ॥——

व्यूढावुभौ तौ विहितोरुघोषौ
वितेनतुर्विग्रहमाग्रहेण ।
संवर्तनिर्यात्य समीरवेग
संघट्टमाना विवसानुमन्तौ ॥
परिवृक्षतजौघपतच्चमू
भटभुजोरुपदावयवाम्बुही ।
ततदवाग्नितरुशाखिका
प्रसवपर्णफलेव वनी बभौ ॥

निशिततरकृपाण निकृत्त हस्तिमस्तक विस्त्रस्तमौ
क्तिक जालपाण्डुर तण्डुल भरितानि कालायसा

ग्निरस्त्रपात्राणि प्रत्यग्रतरसखण्डांगारसंगतायां
नैस्त्रांशिकघटितांगारधान्याम् अधिरोप्य मु
खार्पितविभ्रष्टशुण्डाखण्डनलकमुखवह
मानैः पवमानैः पातितसैन्धवजंघाकाण्डेन्ध
नं प्रज्वलयन्तो रजनिचरराजकुमारी रिकाबा
लिकोचितपाककेलिकामाकलयन् प्रत्यग्ररक्त
पानसमुद्रिक्तप्रमत्तलीलालोलवैतालबालक
हस्ततलप्रतीक्षणोत्क्षिप्तशास्त्रयोधवरमस्तक
मध्यान्तरालसमिन्धनप्रवृत्तन- -सन्धानक
बन्धसन्तति: अन्धकान्तकवरगर्वमर्दन्धरद
शाकन्धरभूमिकायन्वकार्षीत —

कोपाटोपाच्चौतभूपालको
दुष्प्रापा लैका ने नानीकपार्श्वः
आगादेगादस्यामैत्री ननोपुः
[illegible] लैस्साकं केसरोद्रंकस्तोव ॥

दन्ताश्चलसन्दानितकुन्ताः समुदण्डशुण्डा

काण्डपरि ⋯ ण्डमानपरिघादण्डाः घण्टाघण्टा
त्कारोपबृंहित बृह्मतरघोषसंहृताम्बुधररंह
सः वीररससमिद्ध सामिद्धार समुद्धरागन्ध
सिन्धुरा मदधाराधोरणी सारणी प्लावित वसु
न्धरा सञ्चारचतुराञ्जन गिरिकूटसंघा
टाः संगरकेलिसरः प्रविश्य मृणालकाण्डानीव
बाहुदण्डानुन्मूलयन्तो घनतरोरुकाण्डे रंभा
स्तंभसंवानामुत्तंभयन्तः क्रोधरसपुष्कलव
दनपुष्कलानि पुष्कराग्रेण निष्करुणं निष्पी
डयन्तो वीरवरधैर्यवारिपूरमाविलयन्तः
सरभसं मांसमेदोमांस्तोक्ष पंकशेषमकुर्वन्

विपक्षवक्षो विहितैकपादैः
शिरांसि दूरं चरणान्तरेण।
समुत्क्षेपद्भिः सरयं गजेन्द्रैः
कृतानि किं कन्दुकखेलनानि॥

रणमहितलपात्रे कालरात्र्याप्रभैक्र्या

परिहितपरिषेकप्रक्रियां स्मारयन्तः।
पदयुगलगृहीतान् भ्रामयन्निस्मतूर्णं
वमदुरुधिरौघान् वैरिवीरान्कराग्रैः॥
वेतण्डेनोवाहनैकं कराग्रात्
विक्षिप्याभाद्योऽस्मिन्दन्तेन भिन्दन्।
विध्यन्नूर्ध्वं विभ्रमेणैव वीरो
वेगोत्क्षिप्तं नारिकेलं कठार्या॥
निपात्योर्व्यां किञ्चिन्निजपदकुलाक्रान्तचरणं
करे धृत्वान्यांघ्रिं कटुचटचटात्कारमुखरम्।
प्रचण्डो वेतण्डः प्रहसमवकर्षन्निरुरुचे
जरासन्धं भिन्दन्रणभुवि मरुन्नन्दन इव॥
भीतं प्रमितं समरादपेतं
वीतं समध्ये किल वेष्टमानम्।
चैतन्यशून्यं सकलं स्वसैन्यं
त्रातुं नृसिंहः तरसा जगाम॥
आरुह्य स्वयमपि हस्तिनं महान्तं

सन्नद्धः सपदि स दाव राजसिंहः ।
हस्ताग्रस्फुरदसिरभ्यगादरातीन्
आश्वास्य स्वबलं मर्षयोगमात्रात् ॥

अभ्येत्य चिरात्तगर्जित मुधौदस्त मस्तकतया सम
स्तमपि नभस्तटं युगपदापिबतेव कुञ्जरेन्द्रेण कु
पितकुण्डलीवरोद्दण्डया कुलिशकर्कशा निर्मि
तान्तेन दन्तेन चालितवसुमतीचक्रैः चरण
चक्रैः दण्डधरभुजकाण्डाभिधेनवालेन नि
र्जित निर्घातस्थम्[illegible]त्कारेण मुद्गरेण च विभञ्जि
तकौन्तिकसञ्चयं विवासितप्रासिकं विरतसानिखि
ल पारश्वधिकम् विनिष्कासित धानुष्कम् नि
षूदित निषादिपरं निबर्हित सादिगणम् निर्म
थित चार्मिक निर्गलदान्त्र मौद्गारिकम् नि
यन्त्रित वैजान्तिकम् निष्पीडित घोटकम् नि
र्गन्थित सिन्धुरम् निखिलमपि तदनीकं
निरवशेष मकार्षीत् ———

प्रथमशिखरिवर्ति वैकर्तन इव महस्तातिथिः तमस्तोमं मदहस्तिवरमस्तकगतो विशिखस्तवकैः समस्तमपि शात्रवबलं विद्राव्य सपार्थिवव रः संमुखीनतया समापतन्तः समन्ततो बाण सन्ततिं वर्षन्तं चोलनरेन्द्रं अन्धकान्तक इव जलन्धरं रघुकुलधुरन्धुर इव दशकन्धरं सरभसमभिजगाम॥

अन्यूनमन्यूदयदुर्निरीक्ष्या
वन्योन्यजन्योन्नतिवादलोलौ।
प्रकृष्टमातुः प्रतिचक्रतुस्ता
वदृष्टपूर्वैरखिलास्त्रमार्गैः॥

हस्तेन हस्तमवकृष्य दरौ तदाग्र्यां
संघट्य निष्ठुरहति स्फुरित स्फुलिङ्गम्।
घण्टानिनादमुखरौ करिणौ तदीयौ
चण्डाहवक्रमचलं करणं व्यधत्ताम्॥

घनघननिक्वणत्कनकघण्टमकुण्टपद-

क्रममयतः तदीयकरिणः पृथुकुंभतटे।
गुह इव क्रौञ्चकुद्भु विदारि मतिन्तरया
न्यमुञ्चत कुन्तमन्तिकचरान्तकमान्तरङ्गम्॥
तदा कुन्तसन्ताडन छिद्रित हस्ति मस्तकोदित
रो सम्मौक्तिकरक्तझरो ताराजुबान्धवराने सन्ध्येव
चोलेन्द्र भुजप्रतापगाम्भीर्यमदस्तमय समयं
स्वयमनक्षरमाचचक्षे॥—
तदा किंचिदाकुंचित जानुयुगं अ
चल पुष्करं अनुन्मीलित लोचनं अनवगम्ता
कुशसूचनमस्तकम् अवनाते हस्तिपतावपराव
तारनारासे ह्नो नृसिंह भूपालश्चोलेन्द्रम्
कञ्चुकिनामिव वैनतेयः कुञ्जरामिव पञ्जरम्
खः सारंगामिव चित्रांगः जीवग्राहं जग्राह॥—
यस्मिन्क्षणे तस्य चमूसमूहः
तत्रासकुत्रापि पदं न लब्ध्वा।
प्रचण्डवाताहत पद्मपत्र

पारिप्लवांभःक्षणिकाप्रकारः ॥

गृहीतमात्रे युधि चोलभूपे
कृपानिधिः श्रीनरसक्षितीशः ।
सतां न्यषेधत् समरात् स्वसेनां
सतां प्रसादो सहजो न रोषः ॥

तदनु करालकरवालदलितमदावलकुंभमूलोकूल समुल्लसिता लीन विमलमौक्तिकजालः लीलावाचालेनातिमानुषपौरुषोन्मेषितदिविषदाभिवृषितकुसुमवर्षविसृतमधुरसविशेषशेमुषीपुषा सविधगतविविधबिरुदावलीनिशमनकन्दलदन्तरश्मितानन्दांकुरनन्दनीयेन निदाघजलबिन्दुनिकरेण तारकितवदनचन्द्रः समररमासमागमप्रत्युद्गमायेव समुद्गतपुलकोत्करः परिश्रमापनिनीषु विजयश्रीकरसरसञ्चालितलीलासरोरुहपारागविसरैरिव रजोनिकरैर्धूसरितकपोलदेशः दुर्भवपरिपोषवि

त्रुटित तनुत्रान्तरदृश्यमानघर्मितगात्रबिंबि
नैकटिकानेकलोकतया प्रदर्शितविश्वरूपइव वि
श्वंभरो विततसंरंभतया निष्कंपइव महांभोराशिः
विश्वंभरावरो विरतसांपराययापि विजयोदयवि
जृंभतामाधिकसंभ्रमया वरूथिकन्या पाथोरुहा
धीरा इवा भीरु परंपरया प्रकाशमानाः प्राविवे
शतदानीमेव तदीयराजधानीम् ॥——

अथवागत्य वार्तामिमां अत्रारभर
समुदाशयः तदात्वजाव हित्वा समस्तापत्यभृत्यधरि
त्र्यादिकं वस्तुजातं कुत्राधुना परित्रातुं असून् विद्र
वामि इतिकर्तव्यं किमप्यविदित्वा विमुग्ध इव निरुद्धइव
विप्रलब्धइव वर्तमानो मरुवपाक वो निपत्य स
मुद्रतीरमध्ये कुत्राप्यद्रवत् ॥——

तदनु विहस्य नरसिंहमहेश्वरः प्राविश्यमधुरा
पुरीम्. तत्रत्यनृपोपदीकृत समस्तवस्तुजातः रामे
श्वर प्रणिनंसया सेतुमार्गेण निर्जगाम ॥——

निर्गच्छन्ननन्तसरणिलंघनजंघाल तरंगतुरङ्ग
म संघात निरंकुशाभिः घाटक हाटककशावि
शारद समीरवशौन्निद्र विद्रुमलता वितानम्
अभंगुर रसोत्तरंगितगंगादिमागांगनासमालिं
गन शृंगार पुंखानुपुंख पुलकांकुर शंकाकरबुद्
दन्यर्बुदम्

आकाशतलोल्लेखिनी कान्तारकूपकाञ्च
ल पताका निभात आकारित पाकाहितैरिव माना
कादिभिरुच्चैः राकाक्षितनिवासैः उपरिनिरस्तशी
करस्तोम निस्तल मुक्ताफल विकरण व्यस्तमुख
शुक्तिपुट प्रशास्तैः अंबुस्तंबेरम माहस्तोन्मूलि
त विस्तृतपुण्डरीकस्तबकानुकार निशायस्तैः अ
लभ्य मथनप्रकार पारिप्लवकल्पपादप विभ्रष्ट
पुष्टकलिका विकल्पैः निजनदराजपन्द समुत्तेज
नकार्मण निर्मल चामर सधर्मभिः वरुणगृहविता
नदुकूलैः वनमालिशयनकूलैः तन्नाभि विधिम

रालैः फेनजालैरलंकृतम् स्वलौकसरणी समुल्लोल
पृथुलकल्लोल निकरवेगसमाघात विशंकलितग
गन विमानगलितचक्र नक्रवालतर्कनीयैः। अम
ल पुष्कर बिंबित पुष्करचरचक्र पादचरणाग्र
चक्र चतुरिम निष्कासिभिः कृत्रिम मणिपत्रिका वि
वाह पात्रिमकुतुक सलिल राजपुत्रिकाजन निर्वर्तित
नीराजनवर्धमान निकरमध्य विनिधारणीयैः स
मुत्कट बाहोर्मिघटा घाराट निषादि जलमानु
षवटु झाटकरपुटाटोपैरंकित वेत्रघटितखेटक
पेटक पाटव विघाटकैः बाडबकूपीट जातहेति
कोटि वेधादिव गाढतर रूढकालिमाभैः सेतुवि
रचनावकाश मान्द्यदर्शनाकुण्ठतर कोपदशाक
ण्ठदमन सव धूकार्धपिण्डित सलिल कुण्डलि
कुल फणामण्डलफलक साधर्म्यकलितनर्मभिः
कूर्मसमूहैः समुन्मीलितमहोर्मिकम्। —
अम्बुपानकराम्बितादरकालाम्बुवाह विजृंभित

कम्पमान शम्पा लता विडम्बित निलिम्पपुरनितम्बि
नी पुनरुदयाडम्बरम्। शैवाल तन्तु सन्तान वेल्लित
कारमकरीतुरीप्रचार विचालित वीचिकोत्करत्नेन
वेलानिलकुविन्देन रामचन्द्रस्याभिनवमुद्गतं
कमपि यशःपटं निर्मातुमिव तिर्यगर्पित दण्डा
नुकारिणा दशकण्ठादिरजनीचर निपात हेतुना
सेतुना विराजितम् निष्पन्दान्तरालनीरपूरमु
कुरबिम्बित भुवनकदम्बदम्भात् अभ्याशगतच
तुर्भुजाध्यस्त विश्वंभरत्व विद्यामिव विद्योतमानम्
भूदार धारणोदार पुराज भूदार विदारणव्रणग्र
न्थिलशरीरसन्धिभिः। मन्थानगिरि सन्धानारि
मायाकमठापीलनैष्ठुर्य साक्षिभिः। अमोघ
राघवहस्तलाघवश्लाघाधुरन्धरैः चिरन्तनज
लमानुषैः निरन्तरं पाशायुधावरोधसौधवा
तायनैः नवनवमणिमरीचिवीचिनमुचि
शरासनोवल्मीकैः आकल्पित केलिजलदवता

चक्रडोला चक्रवाकैः अनवरतविहारिजलमानुष
योषानाभिमण्डलविवरैः अतिभयंकरः करालमक
रनिकरवालधारिभिः अखेदकमठखेठकपेट
कैः उत्कूलजलकलकलध्वेला समुद्भटैः मन्थर
मथनमहापराधादिव विबुधानां पन्थानं निरुन्धा
नानां कंभसंभवकोपसंरंभादिव अंभःपानसं
पतदाशाकुंभिकुट्टनमिववीचिघट्टनैः उट्टंक
यन्तं गगनमिव गाहविहारकारणम् किरणमा
लिनामिव सन्ततस्यन्दनदीप्रवाहम् गिरि
मिव तमालश्यामलोपकण्ठम् केशवमिव
प्रकाशित शंखचक्रम् विश्वावनधरीणमपि
व्यञ्जित भुवनभङ्गम् सदरमपि आका
ह्लिनीमुखम् सुगतानुगतमपि शैवलासितम्
सन्ततविद्रुममपि जनित सुरद्रुमम् आलवालं
अमरतरूणाम् आपीडोपवनमम्बिकापतेः आ
कारं अप्सरोमणीनाम् अम्बुदं अखिल

लोकानाम् केलीगृहं नालीकनाभस्य गौशीनं त्रि
विष्टपधेनोः कोशागारं पाशायुधस्य नवनवमणि
निचयगर्भितसलिलपूरपरिपाटिका परिविधि
रचितावर्तमुद्रं समुद्रमद्राक्षीत्। अप्राक्षी
समीपवर्तिनममात्यम् इन्द्रनीत इयमेव तुरङ्ग
मान्वेषिभिः सगरराजकुमारैर्निर्मितः क्षितित
लावतारार्थं निधिः किमयं पुरेति। तथैवेति ते
नविदिते प्रमुदितमानसो निर्वर्तित विचित्र
महादानजल समुद्रान्तरोपि नसगरपुत्रान् पव
मुहुः श्लाघमानः दशाकन्धरदमनासाधारण
पदानसम्बन्धकथानुबन्धधुरन्धरैः चिरन्तना
मात्यैः साकं महांभोराशिशायिपीताम्बरपरिरंभ
विजृंभितादर विश्वंभराप्रसादित भुजाकाण्ड
संभावनीयं स्वलौकसरणि समुल्लोल वेतण्डमल्ला
न्तराल वेदिसमुल्लासिनम् लोपामुद्रारमणप्र
तीकारकोपमुद्रा समुद्रेक निर्निद्र समुद्रराज

प्रध्वंसिताच्छकलापसच्छायम् वेनानिलपानवि
स्तृत महेन्द्रशैलाभिध फणफणक व्यालाधिपदीर्घ
तर भोगा भोग लीला पुषम् लंकापुरपंके
रुह निरशांकोन्मीलनाहंकारण संकुल रघुकुल
तिलक भुजशौण्डीर्य वेतण्ड शुण्डादण्ड समु
द्दण्डम् उद्दाम पूर्वसुपर्वा खर्व गर्व निमथन कर्म
निर्वाहक वैशाख धूर्निवहम् ककुत्स्थ वंशप्रशस्ति
केतुम् कौणपलोकप्रलय धूमकेतुम् जानकीशो
क शल्योद्धर हेतुम् विलोक्य सर्गस्थितिसंहरणच
क्र गुणत्रयमपि त्रिगुण इति समुद्घोषयन्तम् पौषित
पितामह शिरच्छेद कार्मणमपि ब्रह्महननादिदो
ष निर्मथनम् सकल निगमागोचरमपि सागरती
रगोचरं रामेश्वरं ईश्वरं नन्दनो ववन्दे ॥ —

नानाग्रहारैर्नवरत्नहारैः
सुवर्णपुष्पैरपिसूक्तिपुष्पैः ।
अभ्यर्च्य रामेश्वरमादरेण -

तस्मिन्निधौ दान शतान्यतानीत ॥
तत्तो बहुविध वसुवर्षतोषित वसुमती दिषदाशीर्वि
शेषपरितोषितः निर्गत्य प्रेषित निजजनाकृष्यमाण
तत्तद्देश धरणीश किरीट शृंगाटक कोटि निवेशित
पदक्रमः क्रमेणापराल्लनदीकान्त वेलापर्यन्तादि
शा चक्रसमाक्रमणेपि समग्रतरात्युग्र शौर्यसूर्यो
दयः सागरान्तरावासदुर्लंघां लंकामिव रघुपुंग
वः कावेरीपरिवेष्टितां श्रीरंगपट्टणाभिधां आव
रिष्टपुरीम् ॥———

स्थिरे जले सेतुरकारि पूर्वं
तदद्भुतं नेति कवेरजायाः ।
सेतुं प्रवाहेषु गुणाभिरामः
चित्त सतामद्भुतमप्यबध्नात् ॥

सेतुमार्गसरभसतात्तितैन मुद्गरयन्त्रचक्र पृषत्क
खड्ग मुख विविधायुध वर्गनिरर्गलेन अतर्कित
सम विषम कर्कशाम्मद्दुक्रमेण निजचक्रेण तं

मण्डलाधिप पुण्डरीक वाह्वाविह्वारमिवकुण्डलयन्
विद्वेषण रक्तवर्पसूचक सपरिवेष विरोचनबिं
बकौशलमिव प्रकाशयन् परिवेष्ट्य निष्ठुर समा
क्रमण दृष्वीराधिकोत्साह साधारणाधिरोप्य
माण विविधनिश्रेणिकासहस्राम् प्रशास्य सुभट
वरमहोद्रेक समानावनमत्खनित्र निर्दय निर्दल
न विभिद्यमान शीलाकारप्रकाराम् निस्तन्द्र
यन्त्र शिलाचक्र निखात निपात्यमान विजयपा
र्थिव शृंग संकाश विशंकट शृंग संघाटां पु
रीमिमां समाक्रम्य वित्रसभर पुरस्थापितस
मस्त वित्तजातम् अपत्यकलत्रादिभिः मत्रादि
भिः समागत्य पदयोर्निपत्य आत्मनो गत्यन्तरा
भावं उद्योतयन्तं महावीरं पार्थिवम् प्रत्यगाक्र
पारसाभिषिक्तं तत्र परिस्थापयित्वा तदात्वदाव
तत्व दुर्मुकारादि महादुर्गजालम् अग्रहीत
दुर्गं प्रगृह्य तरशांग्याभिधं विपक्षात्

स्वर्गं विरोचनसुतादिव शार्ङ्गपाणिः ।
गोकर्णनाथमनमत्सुतदारशोध
क्रोधादिवापरपयोनिधिनापरीतम् ॥
तेने तुलापुरुषदानपूर्वं
तेने ह नानाविध दानजातम्
संख्ये भवन्त्यद्यापि स्थूललक्षः
सस्थूललक्षो हि विहायितेषु ॥

ततो विनिर्गत्य सत्वरमुत्तरां हरितम् अभिप्रस्थितवति मण्डलीकसुर्ये तदीयधामोष्माणमसहमानः शक्रमुखानेक महीनायकानुगम्यमानः कांबोज बाह्लीक मरुखा तुरुखार खुंखाण तुरग रिंखासंवृत स्फुटित धरणीतलोऽपि सुरत्राणः प्राणत्राण परायणो दुर्गमं मानवदुर्गं तत्क्षणमध्यरुक्षत ॥

त्रासाद्द्रुतं मानवदुर्गमध्ये
धृत्वा सुरत्राणवराहपादम् ।

अमुन्यतानुगत(ह) धीरसधीशे
गृहीतमाब्धिं किलकुं भजन्मना॥
प्रदक्षिणीकृत्य परिभ्रमान्निति
स्थितिं तदाकेवलमेवनाजयत्।
भुजापदा स्फुरितैः गुणोत्करैः
अपि त्रिलोकी पुरन्दरः॥

तुङ्गतर तुरङ्ग भङ्गात तरङ्ग पर्यंक प्रेङ्खोलित पंकेरुह सौरभानुबन्धि गन्धवह स्तनन्धयाचान्तपथिश्रमः विश्रंभराभरो विषगाभिवृष्यमाण हिमजलप्रवाहेण कालितमङ्गलाप्लावनाम् समुत्तुंगशृङ्ग संघट्टित शशांक बिंब विगदमृतपूर शंकनीय बहल सुधापंकलेप शृंगारित नैकविधप्रकारवलय निर्वतित पत्रोर्णपरिधान संविधानाम् उपवन पवमानकुमार समानीयमान प्रसूनमञ्जरी पराग रिङ्खोलिका संपादितया वासचूर्ण समालंभन मिव संभावयन्तीम् विस्तृतर दीप्ति वि

सरमरुत्वदुपल प्रासादसन्दानितकेतुवैजय
न्तिकतया करपल्लवैनानुकलं अलकसमीकरण
मिवाकलयन्तीम् समुन्नतसौधवातायनस
मुच्छ्रितच्छ्रवासधूपच्छद्मना प्रत्युत्थानस
मुद्यममिव विद्योतयन्तीम् विद्यापुरीं प्रतिप
द्य सरसविलोकनचन्द्रिकाभिः अनुगृह्णानो
यथोचितोपचारसंभावितानुयात्रिक
पार्थिववर्गः निरर्गलहृदयोल्लासः प्राविशादुद
वासितम् ॥

नित्यप्रत्यक्षपूजानिरतनिजपुरीनिर्गमाशा--
स्थानन्दानप्रमुदितमनसः सानुकंपं प्रतीत्य ।
आसेतोराहिमाद्रेरविहितसुमहाशासनः श्रीनृसिंहः
पारावारैः परीतां भवनामिव निजं पालयामास धात्रीम् ।

निष्कण्टकीकृत्य नृपोधरित्रीं
अमात्यवर्गेष्वधिरोप्य राज्यम् ।
साहित्यसङ्गीतमुखैः प्रसङ्गैः

निनायकालं नियतप्रसन्नः ॥

कुलेन शीलेन गुणेन धन्या

कन्या मयाकापि विलोकितेति।

कथाप्रसङ्गैः न कदाचिदूचे

पुरोहितः पूर्णमनोरथस्य ॥

तदीयवचन निशामन मात्र समुद्रिक्त कौतूहलः किंयद्वा वयः कीदृशं रूपं किमीयमपत्यं कीदृशो वंशः के पुनरस्या बान्धवः कुत्रवावर्तते सर्वमवगत्य सत्वरमागच्छतेति पुरोहितं प्राहिणोत् प्राहितस्सफाव तस्याबान्धवमुखा दृत्तान्तमखिलमवगत्य राज्ञे विज्ञाप्य तदनुमत्यासाकं अमात्यगणेन दिवसकरकुलोत्तंस राचिराजरत्नाकर रेखां श्रीरामाम्बिकागर्भ शुक्तिमुक्तामणिं अन्यूनतरान्वयोचित शील लावण्यादिगुणगण धन्यां कन्यां ओबमाम्बाभिधानां आनीय यथाविधि धरणिभुजा पर्यणीनयत् ॥

शांकरीमिव शशांककिरीटः
ताम् उदूह्य धरणीपरिणेता ।
स्वर्विभोरपि मुहुः स्मरणीयां
निर्विवेश निखिलानिह भोगान् ॥

कुलप्रदीपं गुणिनं कदा वा
सुतं समासाद्य सुखी भवेयम् ।
इत्यच्युतं प्रार्थयमान एव
कालाननैषीत् कतिचित् क्षितीशः ॥

कदाचन स्वप्न समागत रमासख वितीर्ण कुमार वर वरप्रदान वचन प्रसङ्गेन सह परिस्फुटावलग्नायाः सपत्नीजन वक्त्र शतपत्रैः सह मेचकीभवदुरोज चुचुकायां पार्थिवः प्रमोदवीचिकया सह्रोपचीयमानाखिल प्रतिकाया वयस्या जनमनः प्रसादेन सह अतिविमलतर कपोल पालिकाया अवचनप्रकाशित निर्भरगर्भभरायां नृपालानीत समस्त वस्तुजात निस्तीर्णदोहदायाः तस्यादे

व्याः प्रकटिताखिलजनप्रमोदयोजनो वैजननमासः प्रादुरासीत् —

अथ तदानीमवनीपतिः आत्नीयसमस्तकार्तान्तिकवर्गं प्राकाम्यतया पुत्रोदयसमयं प्रत्यपालयत् —

दुग्धाम्बुराशिलहरीव तुषारभानुं
अर्थं नवं सत्कवि भारतीव।
प्रत्यङ्मुखस्य यमिनः प्रतिभेव बोधं
प्रासूत भाग्यमहितं सुतमोबमांबा ॥

नटदखिलजनं नदन्मृदङ्गं
स्फुरदितरेतर पूर्णपात्रदानम्।
नगरमिव विभोर्न भोरुभोगं
जगदभवज्जननेन तस्य सर्वम् ॥ —

उल्लासैः सममधुरुत्सवाः प्रसिद्धिं
प्रासीदन् सह महतां मनोभिराशाः।
आशीर्भिः सममुदगुः मृदङ्गनादाः

काराभिरसमं गलत्किल प्रकाराः॥८

मन्दानिलाहतमहीरुहपुष्पजालैः

मध्याइवाकृष्टतमंगल रंगबल्लीः।

बल्गत्प्रदक्षिणशिखावलयैर्हृताशाः

नीराजनामनुगृहं नियतं वितन्वन्॥९

अथ तदानीं कुमारजन्मसंमद निवेदनाय सरभ
सं अभिपतन्तीनां अनुपदविलंबितं अहंपद
पूर्विकया युगलपदेव कुमारः कुमार इत्युद्घोष
यन्तीनामं अन्तःपुरपुरन्ध्रीणामनुलापेन
पर्वशार्वरीपरिबृढमरीचिपरम्परा सुधापूरेण
कलशाकूपार इव प्रतिक्षणमन्तरुदयदपरिमि
तानन्दभरोपचीयमानवपुः अवनीपतिरप
रजनानोपायिकमप्यंगस्पृष्टमभाणकला
पम् अपरिमितापरिमेय स्वापतेयजातेन सम
वितीर्य तासामासादितप्रसाद सन्निहित स
माहित पुरोहित ससंभ्रमाहूत मौहूर्तिकवर्ग

निर्णीत नैसर्गिकचक्रवर्ति पदार्पणलग्नकः बृ
भगाड चक्र चार समुचित लग्न बलश्रवण द्विगु
णीकृतोत्साह बहुप्रकार प्रवर्तितमहोत्सवः स्म
यसमेत नानादेशागत महीसुरव्रात सात्कृत स
मस्त वस्तु जातः पुरोहितेन समं अभ्यन्तरं प्र
विश्य सूतिकागृह सविधमुपगतायाः पुरोहित
वनितायाः विटंकटांक पर्यंकालंकरणपूर्व
सर्वसहाधराशीखरवर्तिनं भानुमन्तमिव परिस्फु
रन्तं बालकमालोक्य त्रैलोक्यमपि करतलान्त
र्गतमेव तर्कितवान् ——

पूर्णचन्द्र पुनरुक्तमाननं
नन्दनस्य नरपालकेसरी।
विस्मयस्मितवीक्षणाश्चिरं
पश्यति स्म फलिताखिलाशयः॥

विनयनय विवेक विक्रमादिषु
अखिलगुणेषु ममच्युतं विदिता।

अभिजनकृतसम्मतिर्व्यतानीत्
अवनिपतिः सुतमच्युताभिधानम् ॥

आसीदनेनायममेयतेजाः
सदाशयः सद्गुरुवीक्षयेव ।
धीरस्य धीरस्य गुरूपदिष्टाः
विद्यास्समस्ताश्च कलाः कलश्च ॥

अधारयद्धान्नमपास्य सद्यः
सूचीरयस्कान्तशलाकिकेव ।

. . . .

. . . . ॥

उद्यन्तं प्रथमावनीधरतटादोजांसि भानुं यथा
प्रत्यगागरुसन्निधौ तमभजन् प्राभासनाभिःकलाः ।
आमोदं हृदयेषु सर्वजगतामातन्वते सांप्रतं
तापार्ताः परिहृत्य मोहमखिलं तानीव गाढं तमः ॥

अनन्तरं अनन्यसामान्य सौजन्येन अन्यूनाधीत वि
विद्यायुधनैपुण्येन कारुण्य दाक्षिण्यादि गुण

शारण्येन पुण्यतर सरण्यधीन मतिविन्यासेन निपु
णगण्य प्राज्य साम्राज्य रमासमागम पैशुन्य मुखर
कल्याण सर्वलक्षणानुगुण्यवर्णनीयेन कलशार्णो
राशि कन्यकारमण चरणस्मरण निशित निय
त शुभाचरणेन निसर्गोदग्र शक्तिनिराकृत
कुमारेण कुमारेणानेन धरण्याः पतिरात्मनो
नियतमन्यत धन्यतममन्ववायम् —

कालाद्बहोरथ मही विरहासहिष्णुः
माश्वास्य नव्यनिजशाश्वतकीर्तिमूर्त्या।
नानागुणश्रवणकौतुकिनां गुणानां
नाथेन सख्यमभजत् नरसार्वभौमः॥

अतःपरमनुचिन्तित निखिल जनहितकृत्यैः अमात्यैः
अनुनीय समानीत स्पृहणीय विनीति नीति मुख
महनीय गुणगण समुच्चरित निधेः अच्युतधरणी
पतिः स्वयंवरादरणीमवनीं प्रधानगृहिणीपदमानी
य आत्मना राजन्वतीमतानीत

अनुकलं जाज्वल्यमान मणिज्योतिरातपजालजटिले
षु बिलेशयतिलकफणाफलकेषु निसर्ग निशिता
ग्रे निदानक्रोडदंष्ट्राक्रकचचक्रे जलदमार्ग लंघ
नजंघालेषु शिखरिशृंगजालेषु च निषद्य निर्व
र्तित तीव्रतर तपो निरन्तरा वसुधा नि
खिल गुणनिरवद्यं नृग नहुष भरत भगीरथ
नलादि नृपालानासाद्य नीतिपद्यं हृद्यममुमधीश
मासाद्य प्रतिपद्यतामन्दमानन्दम्

महीमहेन्द्रस्य तस्य खालमधिवसन्नमर
न्दनयनमभिगन्तुमिव सन्ततमुरोन्तराल भुज
तटान्तरयोः अविन्दतां वसतिं इन्दिरावसुन्धरे
अथ नरपतेरस्य स्वभावसुभगं वपुः नन्दनमिव
वसन्तो नयमिव विनयो नालीकमुकुलमिव
विकासः नदीनायकमिव विधूदयः नक्षत्रेश
मिव शारदागमः नारायण भुजमध्यमिव कौस्तु
भमणिः अद्योतयत नतमध्याजन नयनामृत

प्लावनं नलिनशरसंजीवनं नटितललितरस
भावनं नासत्यादिरूपपरिभावनं नवयौवनम्
शरणागतनरपालकलोकालिकभावभावुकरे
खाविलेखनमातृकायितोर्ध्वरेखाञ्चलप्रपञ्चि
तमत्स्यरेखया मकरकेतनमथो विधायैवषतेया
मानं संवाहनपरवशाप्सरोहापरिषद्राहेकुं
भसंभावनार्हिता प्रकाशनकुशलकलशचिह्नसम
न्वितम् अनुदिनमहमहमिकया विमतानामवनि
पतीनां अमित बहुविधमणिगणस्फुटितकान्त
किरीटकोटिसंचरणेनापि कठिनतां आदधान
दवनिभुजश्चरणयुगलम्

सामन्तवसुन्धराधिपाकुलल
कुसुमवालमकरन्दपूरनिरन्तरक्षालनयेवचर
णारविन्दतलान्तरे कमलकुलिशातपत्राकाररे
खाः प्रकाशन्ते ———

अनवरतमखिलदैवतपूजोपकरण

तासमासादित सुकृतपरिणतिभिः चरणतामस्य
समश्नुवानं बिसप्रसूनं शश्वदशेषजगदीश्व
रवदनपत्रैः वरिवस्यां अजस्रं आशिश्रियत —

अस्मत्कुलाधिपतिरापजगत्त्रयाधः
पातित्यमित्यपयशः परिमार्ष्टुमेष ।
प्राप्याधिकोन्नततरप्रपदत्वमस्य
कालाद्बहोरवहतां कमठौ प्रशस्तिम् ॥

मनोज्ञतारुण्यमदद्विपेन्द्र
निदंभनस्तंभनविडंबनार्हम् ।
उपर्युपर्यूरुयुगं प्रवृद्धं
प्रियाजनप्रेमभरैरिवास्य ॥

श्रीनृसिंहकुमारोयं सिंहसंहननो भवत् ।
नृसिंहमध्यतयातस्य चित्रं किमिव सांप्रतम् ॥

सकलकलापचातुर्य गांभीर्य करुणारसौदार्य
धैर्य शौर्याराधनरणादि स्पृहणीय महनीयगु
णगणानाम् असंबाध संचरणाय हृदयस्या

वकाशम् प्रस्तावयितुमिव विस्तारतामगाद्वक्षस्त
टम् घनतरोरुयुगलसमाक्रमणभयादिवान्त
र्निमग्नं जानुयुग्ममाश्वासयितुमिवागमदाशागज
कराभोगं मदगलगह निरर्गलं भुजयुगलम्
प्रफुल्लकल्हारपल्लवतल्लजस्थलारविन्दकान्तिस
न्तति सन्तताहरणपरिणत्येव व्यक्तरागं हस्तयु
गं समस्तविमतपार्थिवसाम्राज्यरमानिरन्तर
संचरणेनेव व्यञ्जयतिस्म अनन्यसामान्यं का
ठिन्यम्

विस्तृतवक्षःस्थललक्ष्मीसौधपार्श्वद्वय
निक्षिप्तमणिकलशलक्ष्मीसमानकक्ष्यारि
सुमांसलमांसियुगलम् तरुणिमारंभस्तंबे
रम्भकुंभावमवलंबत रथसाश्लेष साभिलाषिणी
नां राजकन्यकानाम् रागातियोगेन युगपद
नुकलं आभिपताद्भिरिव निरन्तर जयदुन्दु
न्दिभिमद सिन्धुरनिनद निरोध धौरन्धुर्य

हर्षोन्मेष पोष समिन्धानेन परिणाहम्मवहत बन्धु
रा कन्धरा हृदन्तर निरन्तर सञ्चरदञ्जन गिरि
शाकरकञ्ज मुखरपाञ्चजन्य निनदप्रपञ्चव
ञ्चुकित इव रसना चत्वर विस्तृत्वर निरवद्यवि
द्याकूपारा कलापाकूपार धीर रवा पूरित इव
अगाद कुण्ठाः पिकस्वरताम्र कण्ठस्वरः॥

लावण्याब्धिभवो नित्यं तारुण्य शरदुज्ज्वलः।
असंख्येयकलश्चित्रं आननेन्दुः प्रवर्तते॥

अनवद्य तदाननोपमाशा
दुरितेनैव शशी मषी विलिप्तः।
कमलं च सहस्रधा विभिन्नं
कथयेत्साम्यकथां बुधः कथं वा॥

प्रतिनव लावण्य पूर विहार पारीण विलेचनवै
सारिण युगापाङ्गः कान्तिसुधासान्द्रकपोल युग
ल चिबुक भागलग्ना प्रत्यग्र जंबाल नीलिकालिके
कान्तिनिसर्गादग्रकपोल युगला घ्राण मधुराधार

बिम्बचुम्बनलालस विलासिनी परिषदसकृत्प्रहितस्यं
गनासितकटाक्षवीक्षांकुरशंकामंकुरयन्ती अक्त्य
तिशयप्रसन्न पन्नगपतिशयनलालनप्रसारितशय
प्रकाश्रित शासंशयकरी चिकुरभारपरिणत श्रृंगा
ररसपूर तटबन्धायित समुन्नत ललाटपार्श्वद्वयदृश्य
निष्यन्द सन्देहकारिणी। तरुणिमवारणेन्द्रमदरे
खानुकारपारीणकुसुमचापादिमाभिरूपपारि
षदसकृद्विजयप्रशस्तवर्णालिकेलि निर्णाधिका
धरणीन्द्रवदन चन्द्रमासि श्मश्रुराजिरसराजिष्
करुणावरुणालय पवनविहारकृतावगाह सरोरु
हाभितः प्रसारितबाहाविक्षेप समुत्क्षिप्त तरङ्गस्सो
मैरिव विस्तारितम्।—

शतपत्रनयनचारित्र विविधस्तोत्रश्रवण
पात्रतापवित्रं श्रोत्रयुगलमादरेण समाश्लिष्यादिव
अतिमात्रमायतमपाङ्गप्राङ्गणारिङ्खणनिपुण विहगे
शरथ नतांगी प्रतिफलदङ्गपिशाङ्गिमशंकनीयेन

गतिप्रसर प्रतीपश्रवणो परिसमुपेत कोपोदय निरूप
णीयेन शोणिम्ना सुपर्वाधिपकुमार सुरभिचापम्
स्वाभिरूप विजयप्रशंसिना वंशध्वज दण्डसंगत
कौशेय पताका संशयकरेण सन्तत सन्निहित नि
जनन्दिनी सन्दर्शनागत दुग्ध सिन्धु सगन्धेन नि
खिल खञ्जमुखी जननयन जीवंजीव रञ्जन कौमु
दी पुञ्ज मञ्जिम व्यञ्जकेन धवलिम्ना सन्तत ध्या
न सन्दर्शन वशापुरस्सन्निहित पन्नगरथ स्थिरप्राते
बिम्बकान्तिसंभावनीयेन विजृंभित स्वाभाविक प्रभा
सुधामहांभोधिमध्यानिष्यन्द निलीन करुणारस
वर्षामोघ नीलमेघ पृथुकश्लाघनीयेन कनीनिका
कालिम्ना अत्यन्तं गभीरकान्तिपारावार कृतावतर
ण शोणनद भागीरथी तरणिकुमारिका चातु
रीमूरीकुर्वाणम् परवरणीश्वरणां कैश्वर्य नि
र्माण स्थिरीकरण संहरणानुगुण गुणत्रयमिव
प्रकाशयत ।

आश्रितवर्ग समासादितामोद प्रसादगुणं अखिला
नन्द सन्दायकं अंगनाजनानुराग सागर सुधाक
रः वदनराजबिम्ब पूजाराजीवकान्ति समुत्तेजकं
अराजत लोचनयुगलम्

पैशुन्यपरापवाद परनारी वर्णना
कर्णन निशेधविहित प्रकारं मण्डलानुकारिभिः पाकवा
र श्रुताशेष विद्वेष वसुमतीपाल राजन्य रमामृगी समा
ज समाकर्षण पाशावलयितकाशैः लेखावलयै रुपेतम्
अवर्णनीयं कर्णद्वयम् अनवरतसमागच्छदच्छ
नयन शातच्छदच्छवि रमासमुपवेशनाय प्रतिष्ठितं
अपनित्य जगत्यन्यत् पुनरस्तिवा नवेत्यु द्घोषकया
विलोकयन्निव शाश्वत सौमनस्य प्रशस्य निजनि
श्वसित पर्यदुदञ्चदामोद भर प्रपञ्च प्रनु
न्न भुवन समुन्नतः अभ्यर्णगत वदनशात पर्ण
सौरभ विशेष निर्णयाय पाव(के?)श्चे दविनीलञ्चलः
पाशांरिराशिवंशामणेः नासावंशः पुरातनपुण्यपरि

पाकरचितसपत्नलोकसाम्राज्यरमासमाकर्षणय
न्त्रवलय विलासगान्त्रिम अशेषजगतीपतीनां ज
ष तिलको भविष्यतीति व्यक्तीकरणाय सितपत्रपत्र
निर्वर्तित तन्नुरूप मुद्रानुकार निर्णिद्रा मूर्ण
मुद्वहन् । दुष्ट धरणी भृद्द्रष्टागमान ध्यायाष्ट
मी स्पष्टीकरणाभिनिविष्ट कुमुदिनी ष्टार्थ निधा
रणीयः व्युष्ट कमल समान दृष्टि निविष्ट रमापुरः
प्रतिष्ठापित कनको न्मुष्ट विहारि शारिफलक दृ
ष्टान्तः महीपतेः अष्टो तिष्ट ललाट पट्टः ।
चापल संयुक्त विस्तृततम मस्तकेमाति प्रस्ताबकः
कमनीयवदन कुमुदिनीरमण लावण्य पूररत्नाक
र लहरी लय बद्धि निरुद्ध निर्वर्तमान विकर्तन नन्दनीयः
सौन्दर्यरमासमेत तरुणिम विहार संकेत तमालवनकु
ञ्ज भावसमञ्जस परिहृत पञ्चशर निदाघ वञ्चित
चञ्चल नयना दृगञ्चल पथिकश्रमः समदृश्यत यौ
वन बर्हिण बर्हभरानुरूपः केशकलापः किंतु

चापमिव कन्दलत्फलं जातरूपमिव जातसौरभम्
अस्फुरद्वपुः अतीव मेदिनीनायकस्य नवयौवनो
दयात्

विद्वेरीक्षण गोचरो नयगुणो वीरोरसो मूर्तिमान्
प्रत्यर्थिक्षितिपैः सुहृद्भिरुदयत्प्राणो नभः पादपः ।
धर्मः संघटिताकृतिः प्रकृतिभिः ताम्राधराभिः पुनः
साकारस्मर इत्यपि क्षितिपतिः सर्वैर्मुदा गृह्यत ॥

विलासरसदनं विशेषज्ञताया: विश्वासभूमिः विश्राण
नस्य सिद्धिक्षेत्रं शक्तित्रयस्य आलवालः सुशीला
नाम् आलंबनं गांभीर्यस्य शरण्यं सौजन्यस्य समा
जः सुचरितानाम् संकेतभवनं संगीतस्य सौहित्यं
साहित्यस्य अनपायभूमिरुपायानाम् पण्यवीथिका पु
ण्यानाम् समाहारः साहसिकतायाः सन्दोहः सौन्दर्य
स्य सर्वस्वं सरसतायाः नित्यवासः सत्यवचसाम् दोक
मत्यं विशुद्धीनाम् उदवासमिः शौर्यविलसितानाम्
सूतिपर्यं गृहं नीतिपथस्य सामानाधिकरण्यं प्राया

कगुणानाम् समुपतिरभूत् ।

अथ कदाचिदश्वनशान्निर्गत्य धरणी

जानिः आजानेयमानयेति समीपवर्तिनं कंचन कं

चुकिकुलाध्यक्षं आदिक्षत ॥

तदा विनिर्गत्य तुरंगशालां

प्रविश्य पल्याणिनमेव पूर्वम् ।

चैतोतिशायि स्यदसंप्रदाय

मनीनयत सोपि हयं रयेण ॥

उभयपार्श्वगत पुरुषद्वय हस्तगत दाम निलीन वल्य

विकृष्यमाणमपि शब्द दुपर्युद्गम ललोन नभश्च

रण गर्वितं उच्चैः श्रवसमवरोपयितुमिव इच्छ

न्तं प्रतिक्षणोत्क्षिप्त खरभ चलाचल पुरोभागैकच

रणतया दुर्विनीत सर्वंसहापाल खर्वेतर गर्व

दर्वीकर विषवेगान् उर्वशाया रजो भसित पूर्वा

मिवावतारयन्तं वेग विषय बान्धव विहग धु

रन्धर परिपान्थिभूत वातन्धम कुल निर्गन्ध

रसानुबन्धेन वसुन्धशातलमिव विदारय
यन्तं सुपर्वसरणि संचारदुर्वारिगर्वगृहसा
र्वभौम शतांग गान्धर्वसमूहमिह यमानं आहवमु
खतिभ्रष्टानिष्ट नृपालिजगर्वनिवासार्पण दृष्टाप
राध वसुधाकुदृनक्रममिव विस्पष्टयन्तं मन्दर
यान्, बन्धवशासन्ततोदस्त शाब्दगृह युगतया
पक्षिकुलाध्यक्षाशाशुक्षाणि सरवैव वेगविषये
मम लक्ष्यमिति करांगुलि युगोत्क्षेपाभिनयपूर्व
मिवाचक्षाणं समस्त विमत पार्थिव समरविजिगीषा
निरसन सरभसोदस्त गाढहस्तमिव विद्यो
तमानं जंघावेग जनित भंगरवारंगकुलोप
हत भृंग युगांक मिव शांकनीयं वदनागल
गन ... फलगुतर वल्गु वल्गावलय चमत्कारात्
सलिल पानाग्रहयुगपद्गृहीत मन्दाकिनीकन
कारविन्द मृणालतन्तु सन्दानितमुखमिव
संक्रन्दनन्दन सैन्धवं सरभसग्रहण चञ्चल

फणाचञ्चल मणिसञ्चय रुचिरञ्जितकञ्चु
किकुल सञ्चलच्चञ्चु भागमिव मुञ्चकेशरयं
प्रतिदिनमभिनषतया विरच्यमानकलादिगाच्छा
दन निजवेगकीर्तिच्छटापुट समुत्तेजन
कूर्चकलापसच्छात्रैः पीवरायत स्कन्धभागकेदा
रान्त कन्दल दवनीन्द्र विमल यशस्यन्ततिकल
माङ्कुर सन्दर्शनीयैः असारणवेग विधुतिभय
धावितहरिण धारणापराध निरोध सावधान सु
धाधाम प्रेषितावसर प्रतीक्षे दीधिति धोरणी
रमणीयैः केसरकलापैः उपशोभितं जनपंक्ति
सन्दर्शनमात्र कान्दिशीक मृहग सन्दोह विड
बन हास विलासिनेव वल्गा भुजंगय विनिर्गत
निर्मल निर्मोक नर्मोपदर्शिना निरंकुशागमनप्रे
खित खुरटंक संघट्यमान वसुधोत्सङ्ग पुंखित
धूली संघनिपात साशंक तरङ्गमालितिलकप्र
हितामृतधारामहिताकारेण रोषावेश वशा

निश्शेषचर्वितानादरपुनर्विमुच्यमानदळीक
रवैरिपूर्ववेगकीर्तिसर्वस्वानिर्वाहकेन फेनजा
लेन विराजितवदनम् अनवरतचञ्चलप्रोथयु
गाञ्चलतया निजविक्रममुखात् विजयरमायैक
मपि सन्देशमिव भणन्तं अखिलदेशाचक्रयुग
पदाक्रमणमन्त्रमिव जपन्तं कर्णगत विमल
प्रकीर्णकानिभात् अवर्णनीयपुण्पकलिकां उ
पहृत्यादृश्यतया निजाभ्यासचराय नथस्ते वे
गरहस्यविशेषानिव मन्दमन्दमुपदिशन्तं अवि
श्रान्तचलितखुरपांक्तिकन्दलितधूलीतरंगसं
कुचितसमीपसंगततया प्रहतावववयं भगवतो
गगनागतै ---- स्मान्तः प्रतिघाटीवेगसमादी
कनैः संक्षोभभयपरिपाटीन्नप्रकटीकुर्वति स
र्वदिग्भिरिवागत्य परिरभ्यान, नीयमानमस्मदा
मित्रसपत्नगोत्राधरपरित्राणपारीणः समुद्र
दाव द्रुतगतिमवामुद्रापांसुद्रेकैः निश्शेषीकृत्य

भवता विद्राव्यतावेति प्रार्थनाय खुरपुटमूर्तिमा
र्जितवता वज्रेणेव गाढगृहीतचरणाञ्चलं व्यञ्चित
कायमिव प्रभञ्जनं मानिताकारगुरुविलासमि
व मानसं स्थलगमनवाञ्छाकलितमहीसंचारमि
व कल्लोशहयं परीक्षितपाक्षिविशेषमिव तार्क्ष्यमिव
पुष्पन्तामिव गवौष्माणं वेगामिव तुरङ्गवेषम् साहस
मिव देहसङ्गतं नन्नृपसभामध्यमिव सततमुखर
चितकविकान्तं वसन्तमिव वर्धितबालपल्लवं वा
रिराशिमिव प्रकाशितदेवमणिं अरण्यानीभा
गमिव अदृष्टान्तपल्ययनवरत्रासिसं ताङ्गिनम्
धार्मिकमिव धाराशलसत्क्रमं नैगममिव नवनय
न भाण्डहारिणं राघवानीकमिव सुग्रीवमुखं
मायागजरणांगणमिव महारव्यरसितकाठिन्यं
स्फुरितखलीनमपि भुवि विलसन्तं केसरिणमपि
धृतहरिणराजिकाननम् विनीतमपि विरचित
बालचापल्यं अनुकलाकलितसत्कृतिमपि अध्वानि

धीरं महान्तमश्ववर्यमपश्यत । ———

सविधोपगतेन सादिना

धृतवालव्यजनेन जालितम् ।

हयरत्नमयं विलोकयन्

अवनीभृद्विषदाममत्यत ॥

अनन्तरमानीकमानीतमवनीपतिः आभाषमाणमिव हेषारवैः नयजीवनमुचेशासनमिव उच्चैः श्रवसम् नभसंगमेशामिव केशवः समारोहद्वाहवरम् । अधिरुह्य निर्गच्छन् आत्मसंकाशवयोलंकारैः अवनिपतिकुमारकैः अनुषक्त तुरंगमारूढैः अनुगम्यमानो निसर्गमावलोकनैकाग्रमानसान् निटालतटघटिताञ्जलिपुटामुभयपार्श्वनिषण्णां सामन्त वसुधापालकमण्डलाम् औपयिकालापावलोकनादिकर्मैः अनुगृह्णन्तं परिमितकरितुरगापादात तरंग संकुलतया हास्तिनरवात् मन्दं मन्दं विनिर्गत्य नृपतिरागाहत बाह्याली विहार

महीम्।

अवगाह्य महीपतिः औपवाह्यमाधिरुह्य वस
न्नेवाभ्यर्णचराणाम् अनर्गलवल्गा विभाग-चम
त्काराणाम् अभितःचारीचामरी प्रचारीचमर
धाराटानां अवनिपतिकुमाराणां आटोपान
वलोकयन् दरास्मित विकसितदृष्टिरतिष्ठत्।

कशात्रयाविशारदाः कविचेदश्ववाराह्वयान्
मुहुर्मुरलसंपिका मुखगात्रे भ्रमो विभ्रयै ४।

उदस्तमुखमुल्लसत्खुरमुदीर्णकर्णद्वयं
सकौशलमचालयन् सह विलोकिनां मौलिभिः।
पार्ष्णिद्वयाञ्चलकृतिप्रकटोरुवेगान्
सिद्धान् मुखेन जयतुरंगवरान्धरेयेत्।
नानागतैर्नवसुवीथिषु चालयन्तः
शिष्या इवाश्वचतुरमुष्य पुरः स्वशिक्षाम्॥
केवलस्यदगतीन्यवनादीन्
ह्रेपयन्त इव भूपकुमाराः।

वल्गली इत्यादिका गति लीला
अङ्घ्रिभिर्व्यचलयन्त तुरङ्गान् ॥

इतिदर्शिताश्वगति विभ्रमानिमान्
अपितोषयन् तदनुरूपभाषितैः।
इयमन्यमन्यमधिरुह्य लीलया
विविधैर्गतैर्विहरतिस्म भूपतिः ॥

अनन्तरं आस्कन्दित धौरितकरेचित वल्गितप्लुताभिधान समन्वित धाराप्रपञ्चक प्रपञ्चकसंचरणेन चिरं विहृत्य सकौशलं उपरिकशशाल्यलेन प्रहृत्य कन्दुकमिव निपतन्तं वसुन्धरायां अन्तरिक्ष कक्षासु सत्वरमातिदूरं अभिनर्तयन् समस्तमुत्क्षिप्य कन्तमन्तरा सलीलमवष्टभ्य गृह्णाणः स्वकरसत्वरं अविमुक्त पत्रानिकस्मात् पातनात् पुरस्तादेव सरथाधिष्ठित सम्मुखो दृष्टभूतलेन रयोत्तानिवर्तन नर्तन क्रमा ...... परापतनाभिपतनभूमिमुख गति निरर्गल चमत्कारेण निष्कलंक निजाङ्कधौ

र्य शंकयेव चटुलतर निजाङ्घ्रि भवधूली सङ्गमपि परिहरता निपातानुगच्छदात्मच्छाया तुरङ्ग लिलंघयिषारोषादिव साटोपमभितः त्वङ्गता मनोविलासिता विलसितानुकूलगति हृदयंगमेन तुरङ्गमेन नलनकुलरेवन्तचातुरीमधिकृत्य चारीप्रचारीस्सुचिरं अचीकरन्।

चित्रच्छगत केशाश्व चारयन् सकलं जगत ।
अचारयादिहक्ष्मापो हयमित्यद्भुतं कुतः ॥

श्लोकः तदनु धरणीपालाः तद्विचित्राश्वचर्या विलसितमानवद्यं वीक्ष्य विस्मेरचित्राः ।
चिरमिव मणि भूषा वस्त्र नीराजनाभिः
सहभुवामेव गर्वं सर्वविद्यासमुञ्चत् ॥

वसुनाभरणैर्वसुन्धरेन्द्रा नृपमेन चिर राजनप्रमोदात् ।
इयचक्रगतै निर्जैरयं प्रागपि नीराजित इत्यबुद्धमेतैः ॥

इति विचित्रतरगाते विक्रमैः चित्तमपि जगतां नर्तयित्वा तुरङ्गमम् अध्यङ्गुर रसोत्तंभितान्तरङ्गः क्षितिपतिः अपाङ्गित प्राङ्गित व्याधिता संख्यात नीराजि

कल्याणोप्युदरं थरिर्विधुरमी दानां भ्रमा तेजसा।
सिद्धोद्गीतगुणामृतेन यशसा तेपूरिता स्याग्निनो
जीवन्त्यच्युतरायकोऽनन्तु थवेन दाता त्वदीया श्रीम
हर्षादच्युत भूवरी जयरमामाजौ वृणीते किरन्
खड्गोद्भिन्न म हेभकुंभ विगलन्मुक्ताफलान्यक्षतान्।
सेनापांसुपटीं प्रसार्य रिपुराट् कोटीरहारावली
लाजैस्तन्मद सर्पिषा च नियतं हुत्वा प्रतापानले॥
यशश्च तेजश्च तवाच्युतेन्द्र
प्रतीपभूमीपति दुर्यशश्च।
गुणत्रयी सर्व विधौ निदानं
भविष्यतां विश्वसृजां चकास्ति॥
इति तेषां मुखादाकलितसुधारससेकानाकर्ण्य मन्द
मन्दानन्द निर्भरितमायान्तं महीन्द्रं आतिथ्यहेतो:
अभ्यर्थनापूर्वमाकारयितुमिव अ:गमदखिलागमस
माहितै: अखिलपुरोहितै: सकामागृहीत विविधकुसु
मोपहारो नगरोपकण्ठ बिहारोपकुटं बिना पाकविध

भ्रमेण लिखितम्

तालंकृमीर दुकूल धिक शृङ्गारि मागधसंघसन्धु
ष्यमण विशंकट बिरुद गाथाप्रसङ्ग विशृंखलमङ्ग
ल शंख मृदङ्ग निनद तरङ्गित दशादिगंकण: पुरीम
भि प्रहृष्टचेता: प्रातिष्ठत।
अत्रान्तरे वसुन्धरापते: आन्तिक
चरो वन्दिगण: समन्ततो बहुविधश्लोक पुरस्सरं
तस्य चराचरे लोकपरि पाटीमपाठीत्।
आरोढुमच्युत महेन्द्र हयं गजञ्च
धीरो भवान् वनकाश्यं दिति क्वचित्रम्।
आक्रम्य मौलितल मखजगजाधिपत्यो
राज्ञा तव प्रसभमाक्रमते समन्तात्॥
भूमत्वादयमच्युत क्षितिपतिं दिक्पालकांशं परं
नौजानन् पुरन्दरस्तदधिक: चिच्छेद वज्राद्गिरीन्।
तत्सारं गिरिशृङ्ग यान्ति भमयस्तंभन्तु रंभासमं
खड्गेनैव लुनाति तद्द्रुवमयं पूर्णावतारो हरे:॥
स्वामिन्नच्युतराय तावकरिपुक्ष्मापालनीलालका:

सद्यः कण्टकैः पूरिताङ्गलतिकाः सस्वेदकंपोदयाः।
आश्रित्यापरतिं विलोलनयनव्यक्तीभवद्विभ्रमाः
लीयन्ते विपिनान्तकुञ्जकुहरे व्याकीर्णकेशांबराः॥
खड्गे प्रकम्पिते कम्प्या धनुष्यानमिते नताः।
किं तद्ध्यानात्तादात्म्यादच्युतेन्द्र तवारयः॥

वितरसि फणिलोकं विद्रुतानां नृपाणां
अमरभवनलक्ष्मीं आहवे संमुखानाम्।
अपिच पदनतानामाधिपत्यं जगत्याः
किमिति वितरणं ते कीर्तयामच्युतेन्द्र॥

अच्युतक्षोणिपालस्य कीर्तिदुग्धपयोनिधौ।
ज्योतिश्चक्रं दिवि भ्राम्यद्बुधात्यावर्तविभ्रमम्॥

सरसि विहरसि त्वं शात्रवा वार्द्धिमध्ये
त्वमुपवनसरण्यां तेऽपि ते घोरवनान्ते।
कृतकगिरितटे त्वं किन्तु ते विन्ध्यशैले
कथमरिषु विगानं कथ्यतामच्युतेन्द्र॥

तप्तोऽग्निर्जठराग्निना सुरमणेश्शून्योदनो निर्गतिः

कल्याणोऽच्युत रंभारिर्विधुरश्मीदानां यशसा तेजसा ॥
सिद्धो द्वीतगुणामृतेन यशसा ते पूरितास्त्यागिनो
जीवन्त्यच्युतराय को ननु भवेत् दाता त्वदीयाश्रयान् ॥
हर्षादच्युत भूवरो जयरमामाजौ वृणीते किरन्
खड्गोद्भिन्न महेभ कुंभ विगलन्मुक्ताफलान्यक्षतान् ।
सेनापांसुपटीं प्रसार्य रिपुराट् कोटीर हारावली
लाजैस्तन्मदसर्पिषाचानियतं हुत्वा प्रतापानले ॥
यशश्च तेजश्च तवाच्युतेन्द्र
प्रतीप भूमीपति कुर्यशश्च ।
गुणत्रयी सर्व विधौ निदानं
भविष्यतां विश्वसृजां चकास्ति ॥
इति तेषां मुखात् आकलित सुधा रस सेकानाकर्ण्य मन्द
मन्दानन्द निर्भरितमायान्तं महीन्द्रं आतिथ्य हेतोः अ
भ्यर्थना पूर्वमाकारयितुमिवागमदखिलागम समाहितैः
अखिल पुरोहितैः सकामागृहीत विविध कुसुमोपहारो नग
रोपकण्ठ विहारोपकुटुंबिना पाकविद्य परीमिलोन्मेष

विशेषपारदृश्वा नवीनमातरिश्वा मन्दगन्धवह स्पर्श
मात्रकन्दलदश्वा येनायासजुषा विदूषकेन साभ्यर्थन
मनुरुध्यमानो तदन्तरापूर्वमिव निवर्तित राजोचिताह्नि
क सर्वोपचारसाधनेन प्रधानवैरेण नीयतामत्र दिन
मध्यनिदाघयोगः निदानमत्र स्वामिनः चित्तमेवेति नि
वेदितः तथेति निगद्य प्रत्यपद्यत। नियतविश्मदशि
ल पूर्वं ऋतुगणास्थानं अभिनव सौरभ्यविचित्रितोद्या
नमुद्यानम् —

अनुक्षणं क्षोणि भुजो भुजोय
दस्पन्दता रामपदोन्मुखस्य।
सूक्तं शुभोदर्कममुष्य कोल
मूर्ध्ना किमश्लाघि भुतां समजा॥—

शुभनिमित्तसूचितकुशलाशंसः स्थितिरमणकुलोत्तंसः स्त्री
समान प्रसूनकेसर विसर विरचितासनेन पिकस्वर कोरक
भृङ्गारकमुख निष्पन्दि मकरन्द रसधारा संपाद्यमा
न पाद्येन भृङ्गकुल झंकार तरङ्गित सङ्गीत प्रसङ्गेन

पुरस्तादवस्थापित फलजालेन महीरुह गृहमेधि
समूहेन अजस्रवरिवस्यमाना भ्यागत शुकमुखद्वि
जसमाम्र्जम मन्दगन्धवहोत्क्षिप्त मञ्जरीमाणेकलश
विकीर्यमाण माध्वीक शीकर सेकातिशीतलीकृतं उप
रि विसृमर कुसुमरेणु विसर वितायमान वितानसविधं
पाटल प्रवालान्तर विलंबमान मञ्जरी पुञ्जित (अन्य) पट्टांशु
क गुच्छचामरः तेकाम्रसामी चिन्यम विलासकासार
मसार मणिपात्र विद्योतित चक्र चक्रांक चञ्चरीक पराग
पुण्डरीक मण्डल विस्पष्ट चिपटीकृत पट्टवसन कौशेय
दुकूल मृगमद खण्ड घनसार हिमसमुद्गक चमत्कृ
तं विरचित विविध कुसुमोपहार वसन्त सामंत शृङ्गा
रितं शृङ्गार राज्योपकार्या भवनाङ्गणमिव कमनीयम
कोरक कुचोत्संग संगत पराग रि चोलिका सङ्गताभिः
कोमलतम कुहूमुखकूजित विविधगीते विराजिताभिः
कुलंक चौन्मिषित मधुरस धर्म जलवमिताभिः पारि
प्लव षट्पद परंपरा विलोकन भाङ्कितराङ्किताभिः समु

ल्ल सित शाखावेल्लित पल्लव तल्लजतया समुन्मील हल्ली सक विलासकोलाहलाभिः वल्ली लासिकाभिः उल्लासित मुद्यानमासाद्य प्राविशदमात्यवर्य निवर्तित सार्वभौमोचित सकलोपभोग परिचर्यामुपकार्याम्

प्रविश्य तस्यां प्रयना विधाय
महीपतिर्मज्जन भोजनादीन् ।
विदूषकारब्ध विनोदवादः
पश्यन् द्रुमान् पर्यटतिस्म मन्दम् ॥

स्पन्दमान पवमानकुमार
स्पन्दमान मकरन्दजलौघाः ।
आहरन् क्षितिरुहो नव धारा
मण्टपाइव महीपति चेतः ॥

परिसर विकच स्थलाब्ज बद्धौ
प्रसवरसाहूति पातिनः सकामम् ।
वनभुवि लतिकाः समुद्वहन्तो
वकुलवराः कुतुकं विशोरपुष्यन् ॥

तन्वाना मृदुकं चंक्रमान्नवलता धात्रीप्रवालाङ्गुली
रालंब्य स्मयमानगुच्छनयनैः आलोकिताश्शाखिभिः।
क्रीडत्षट्पदकिंकिणीमुखरितैः क्षिप्तापरागानसुहृः
वल्गन्तः स्पृहणीयशैशवदशावाताः समानन्दयन्।

आरामरामणीयकदर्शनसमुत्सुकहृदयं अवनीपतिम्
औपायिक आलाप रसविशेष परिपोषकः विदूषकः सविनो
दमवादीत्।—

देव निधीयतां इतोपितावदनिमेषतामरसविपिना
वलेप विमोचनं लोचनम्। मञ्जुतरमञ्जरीलोचनाराजि
त केलिकाञ्जनो (लिमा) महनीयशाखाभुजाञ्चलव्याञ्जितचंच
रीकिवलयमङ्गलकंकणः प्रत्यग्रकुसुमपराग निर्वर्तित
पत्रोर्णपरिधानः कर्णिकारः प्रवर्तयति। सप्तप्राश
द्वाह समयमुदाचरम्। समीरकुमारसमुदयमोदि सामो
देन आरामसार्वभौमेण विपिनस्थलपद्मजातमशितं
द्विजसात्कृत्य विमुच्यन्तो वृन्तबन्धनात्कुसुमसन्तत
यः।—

गुच्छस्तनारोपितचञ्चरीक

कुमारजाग्रत्सकुशलाङ्गुलीभिः।

लतावधूभिः ललितारसाला

गदान्ते धर्म्यं रम्यं गृहमेधिधर्मम्॥

दावयाभाषाणं विदूषकं श्लाघयैवालमिति निवार्य कि
मेते पुष्पन्धयाः पंक्तिशः प्राचीमेव दिशामभिधावन्ति
विचारयामः इति पुरतः पदानि कतिचिद चालीत
गत्वा च प्रत्यग्गशतपत्रमधुरसनतृप्तमरालमत्तकाशि
नी मधुरिमोत्तेजितकूजितपुनरुक्तंकलकलस्वनम्
श्रौषीत्।

आकर्णयन्नेव स्वरविशेषज्ञमानेना विदूषकेण
बालरसालवल्लरीपल्लवरसास्वानपिकस्वरमदधा
राकुलानां कोकिलानाम् अविकलः काकलकला
प फाव इति परिच्छिद्य निगद्यमानोपि अञ्चित विप
ञ्चिका गुणोदञ्चित स्वरप्रपञ्च वञ्चनचञ्चु प्रकटि
ताक्षर विन्यास धन्यायेतः कन्यकाजनानां अन्यो

न्यालापऽ इति निर्णीय पुरो विचलन् भवान्यायतनमद्राक्षीत् तमालिके समाकलय तमालतरुकोमलदलपालिकाभिः वन्दनमालिकाम्। माधविके माकन्दधूलीधूसरिताः शोधय शिशिरके सरपाञ्चिकया काञ्चनवेदिकाः। कलापिके निरूपय कमलिकाकलितां कल्हारपरागरंगवल्लीम्। मञ्जरिके रञ्जय मणिदर्पणानञ्जसा कज्जलरोपुञ्जैर्मीन। अधिवासय वासरिके घनसाररजसा केसरकुसुमरसान्। वल्लकी सल्लपिनि कल्हारमुकुलनायकविन्यासेन सम्मुल्लासय मल्लिकाकोरकहारवल्लीम्। लीलावति निशामय ममालापम् बालाशोकमुकुलमालायाः परिहर रभसजालकोलाहलम् कुत्राशाय स्तबकुसुमवाते चित्राणिवा शतपत्रादभिनवकोमलानि कुसुमदामानि इति परस्परमीरयन्तीनां संभ्रमान्रूपान् आलापान् आकर्णयन् अवनीपतिः अभ्यर्णगतं अत्युन्नतप्राकारवलयानिरुद्ध परिसरपरिवर्तमान नवार्णौघरविलासि कर्णेजपैः अनेकहम

जालकैरभिवीतं अत्युन्नतबहिर्द्वार गोपुरतया ज
गत्यामखिल मार्तजनम् अभिरक्षितु मिव उत्क्षिप्त
मस्तकं उदीक्षमाणं विचित्रं अति पवित्रं विवि
क्तं अभ्यपद्यत कात्यायनी भवनम् ।—

तदनु धरणिपालो धावता चेतसाग्रे
सरभसमिकृष्टः सद्म गौर्याः प्रविश्य ।
तटित इव घनौघे तत्र तत्र स्फुरन्तीः
परित इव पुरन्ध्रीः पर्यटन्तीरपश्यत् ॥—

अन्तरा तासां असाधारणसहज सौन्दर्याम् अमर्या
दतरुणिम चर्यां आचार्यामिव स्वयमागृहीत व्रत
चर्यां अग्रतो नयनवल्गनावसरदर्शनैकाग्रमान
साभिः अनुरूपवयोवेषधन्याभिः कन्याभिरन्वा
स्यमानां अञ्जलिना आदाय प्रसूनानि निष्प
न्दमानाखिलांगमवतिष्ठमानां अपर्णाराधना
य धरण्यां स्वयमुत्तीर्णामिव निलिंपवरनितम्बिनीं
सध्योदरचापलदोषपरिहारकारणगतामिव सौ

दामिनीं विषमशरविजयकेतुवैजयन्तीमिव विस्फु
रन्तीं चक्षुरिन्द्रियसंवननमन्त्रदेवतामिव सन्नि
हितां लावण्यराज्यलक्ष्मीमिव आक्षिलक्षणीयां शृं
गारसिन्धुकन्दलितामिव सीमन्तमयूखरेखाम्
नीरुहगृहामुखवर्षोरोहासर्गपरिचय निसर्ग
निष्णातविधिनिर्माणविद्यामिव निरवद्यां दाक
त्रपुञ्जीभूय संचरन्तीमिव मदनसंजीवनकलां
अवर्णनीयलावण्यां अन्यादृशीं कामपि राजकन्यां
अनीनयदाक्षीसरणीम् ।

निर्वर्ण्य सुचिरं स राजन्यो विस्मय
विधेयतया नियन्त्रितइव नियमितइव निराभेद्यइव नि
रर्गलरागाभियोगनिघ्नइव निश्चलध्यानशीलइव
निरवधिकानन्दानुसन्धानइव निरुद्धमानो वृत्तिः
निष्पन्दीभवदिन्द्रियवैचक्षण्यः निर्निमेषवीक्षणः
क्षणमातिष्ठत् ।

स्थित्वांभोरुहशालिगर्भकदलीकाण्डेषु चक्राश्रिता

ण्यावर्त्तं भ्रामितावलंब्य गगनं प्रोत्तुंग शैलद्वयम्।
आरूढोज्वल चन्द्रमण्डल सुधामासाद्य दृष्टेर्विभोः
ज्योत्स्नामध्यमुपागतापि पतिता नीलांबुवाहान्तरे॥

अपिवीक्षितुं वपुरनीक्षितुं पुरः
परिमोक्तुमक्षमतमा क्षमापतेः।
भ्रमरीव नूतन पयोजवीथिका
स्वतनिष्टदृष्टिरसकृद्गतागतम्॥

तदात्वेनमेनमानीतर सुलभानुवोचित रमणीय
वेषं अनुपसर्पणीय सहजप्रभावमप्रमेयगांभीर्य
मप्याविर्भवदन रूप दाक्षिण्यं ऊर्ध्वदृशोः वसन्त
मिववसन्तं अनुग्रह मिव विग्रहवन्तं अवनीकान्त
मवलोक्य विजृंभित संभ्रमाणां किञ्चिदपसृत्य पर
स्परमुखार्पितमुखं किमप्यालपन्तीनां परिचार
क सीमन्तीनां अविश्रान्त कन्दलदाभरणरणि
तानुबन्ध तुमुलैः आलापकोलाहलैः अपविघ्नित
नियमक्रमाक्रमेण ध्यानावसानभाव समुन्मीलित

विलोचना हरिणलोचना तामभिवीक्ष्य तत्क्षणमाविर्भूत
वृद्धसाध्वसा परिवृत्य चित्तमिव तस्य सविधमपि
स्तंभं अवलंबितवती स्तंभान्तरितैः तरलतरान्तरङ्ग
तरङ्ग्यमाण विस्मयरसोर्मि किर्मीरितं प्रेमभरप्रे
र्यमाणा चेतोभवसरयानिखात शितशरव्रात सा
धारणोदित पुलकजात किञ्जल्ककञ्चुकिता प्र
बलतरकौतूहल समुद्ध्रियमाण धैर्यपादपसं
क्षोभेणेवकंपमानगात्रलतिका शंबररिपुसंबं
रमावगाहनरभसोत्कुलिताशयरागसोदरधारा
लस्वेदपूरमेदुरिता मेदिनीपतेश्चेतोरोहितग्र
हणदुर्दान्तकुन्तलभर तमालवनान्तरितलता
न्तरानिरन्तरवृष्यमाण बाणसाधारणैः तदीयम
नस्तामरसस्सारस्य जिज्ञासाप्रहीयमाण मधुकर
मणवजाल लालनीयैः लोकाधिशायि रागाधि
राज्याभिषेकापवर्जितगङ्गा यमुनासलिलत
रङ्गसंकाशैः गांभीर्यमहांभोनिधान प्रमाणप्र

सार्यमाणाखण्डलमणिदण्डानुरागैः सानुरागहृ
दयार्पणतरबिलोचनोत्पलप्रसारित बहातलाबिम्बो
हैः प्रेमरससेकादिबालापैः समिद्धाभिलष भारा
नुसन्धानादिबातिमं ... रैः तदाननारविन्द सौन्द
र्यातिशायि आकृष्यमाणैरिव संमुखीनतया
वलमानैः तारकान्तराल प्रतिफलित धरणीन्द्र निर्ग
मनफाव निरोधफाव मुकुलितैः आलिंगात् हर्ष
तरलतया आपिबद्भिरिव चिरनिमेषतया स्वयमा
कारयद्भिरिव प्रकटतर पक्ष्मपरिस्पन्दैः अमन्दकु
तुकपरिभ्रान्तैः आनन्दपरतन्त्रैः अभिव्यज्यमा
नानुरागारसरसान्द्रैः अनेकरससंविधानैरव
लोकनैः कमलमयमिव कल्हारमयमिव कैरवमय
मिव कौमुदीमयमिव सौदामिनीमयमिव ककुबन्त
रालमखिलं कलयन्ती गाढतरं बिलोकयन्ती कर
णानामप्रभवन्ती कुसुमशरपरवशता मयासीत्

विलसदलसचारैः विस्मयस्मेर तारैः —

प्रणयरसगभीरैः प्रान्तविस्तारतारैः।
बरतनुरवदातैर्वञ्चितासोत्सुशोतैः
प्रसववििशिखदूतैः पार्थिवस्याक्षिपातैः॥

पारिप्लव परस्परावलोकित परिमेलनानुपदमेव परा
स्त प्रत्येकावस्थाना विव व्यस्ताचित्रा विव विनिमयित
जीविता विव परस्परानुप्रविष्टा विव व्यत्याससंसक्ता
विव परिहृत चैतन्या विव विवर्जित निखिलव्यापारा
विरहित विषयालापा विवेका विव विस्मृत निमेषौ
विकस्वर विस्मयरसोन्मेषौ विद्योतिताभिलाषौ
तावुभौ चिरमभूताम् –

तदा बहिर्मण्डपाच्चित्रवीक्षा
विलम्बिनाभ्येत्य विदूषकेण।
पाणिस्फुरत्पात्रिक[?]मन्त्री
प्रतीक्षते निर्गममित्यवादि॥

विज्ञापनाममात्यस्य विदूषक निवेदितम्।
सावधानमिवाकर्ण्य चलितुं समनीन(न)इ नृप॥

सञ्चक्रन्नेव तदन्तरा तत्र तत्र मणिभित्तिषु चित्रवि
निवर्तितानि चित्राणि चण्डिकाचरित्राणि तस्मै
सविस्मयाय दर्शयन्निव नवविलासरसोत्तरङ्गैः
तामेव प्रेमानुकूलां विलोकमानः तयाच सूचित
निजहृदयैक्यं विलोकमानः सुचिरं विलम्बयमा
ननीयं प्रयाणवचनमिति तेन सह भाषमाणः ततो
विनिर्गत्य प्राग्द्वारवर्तिन्याः तदीयधात्र्याः स
मीपे तदशेषवृत्तान्तविविदिषया विदूषकमभिप्रा
यवेदिनं विनिवेश्य तत्तादृशीं तदङ्गसौन्दर्यलक्ष्मी
मेव मुहुर्मुहुरुत्प्रेक्षमाणः सकमनीकेन समासद
त्सदनम् ।—

आसाद्य मन्दिरमशेषनृपान् प्रहित्य
प्राग्भारभाव सदृशाप्रतिपत्तिपूर्वम् ।
अभ्यन्तरं नृपतिराविशदातिस्फूर्ज
मायाल्कोऽपि विपुलो हृदयं तदीयम् ॥—

नृपेन्द्ररन्तःपुरकामिनीनां—

नीराजनामंगलमप्यकार्षीत् ।

सन्तः पराधीनहृदोऽपि सन्तः
सदानुकूला हि समाश्रितेषु ॥

तत्र वृद्धपुरन्ध्रीणामाशीर्भिः अभ्यर्हितो नृपतिः गर्भगृहशयने निपत्य समुत्तामयता चित्तेन रहसि चिन्तयति स्म विस्मरणीयम् अतिस्पृहणीयमस्यैः अचिन्तनीयं अनाख्येयं अतिरमणीयं तदीयरूपधेयम्

सहिष्णुतासंजनितैस्तपोभिः
पयोधिकान्त्याः फलितं चिराय ।
तिरस्कृतश्रीविभवं यदस्यां
स्त्रीरत्नमेतादृशमभ्युदीतम् ॥

सौन्दर्यसारसमवायचमत्कृताग्र्यः
चन्द्राननाः कति न सन्ति वसुन्धरायाम् ।
नर्मस्मितांशमपि तान भजन्त्यमुष्याः
काचेद्विधोरियमहो करकौशलश्रीः ॥

प्रशंसा हंसानां परिभवनमस्या मृदुगतैः
कटाक्षादाक्षेपः कमलवनलक्ष्म्याः परिपणः।
घनानामानन्दः कबरिनिकुरुंबादवयतिः
कुचद्वन्द्वान्निन्दा कुशलपरिपाकः कुलगिरेः॥

प्रतिपदवितीर्णशतपर्णपल्लवजातयोः पादयोः पयसिरुह किसलयोपमानं न समानं साधर्म्यकामनया सरसलतिकांचल सूचिकाशिखासु सम्पादिततपसामिव किसलयानां उपरि विरचितपरिहास ~~मर्मा~~ भंगीनां अंगुलीनां विलासहासरेखा लावनखरमयू~~खा~~ः खाः। ———

शंबराराति शांबर्याः संप्रदायैर्व्यधायि सा।
अदृश्यत कथं नोचेत् आविर्भवति गुल्फयोः॥ ———

शृंगारराजजयकाहलला लनीय जंघोपमानकुतुकी नवशालिगुल्फः।
आसीत्तुषावृतफलः परिपाककाले
व्रीडामधोमुखतया विवृणोति चायम्॥ ———

संभावयन्ती सततं तदूरु-
स्तंभादपायं किल राजरंभा।
पुटच्छलानिककवाटमध्य-
लीनापि नो जातु जहाति कंपम्॥

परचक्रमखिलमाक्रम्य नियतमन्योन्याभिलषितान्युन्नाभोगसमुन्नत्योः आरोहवक्षोरुहयोः अलशा किमिति शून्यता मध्यं भुवि विद्योततताम् मन्दाक्षकन्दर्पयोः माभूदिह सामानाधिकरण्यजन्यं जन्यमिति तारुण्यारंभनतदभायावलं नतया निपातिता सीमा विभागसूत्ररेखेव लोमालिका अतएव तयोरन्योन्यं सामान्यं प्राधान्यं निराकृत नीरुरुहं मुखाब्जमंबु प्रविश्य नियतप्रसन्नांबरं तवाधोवसतिर्ममेति रेखाच्छलात्त्वदप्रावलीनं। आश्रित्य शश्वदिह दर्भिह द्विकरे मुखत्वं पूर्णामृतांशुमभिवीक्ष्य भुवि स्पृशन्तम्॥ श्लो

स्पर्धेन्दुरप्यलकितामभजत् किमस्या
मागोम हत्त्र हतदाव ततोखिलानाम्॥

कलक्षतरकटाक्षकान्तिसन्दर्शितमन्दाकिनीलह
रीसन्दोहसतिभ्रमस्यन्दनमात्रविनिवर्तितानल्पकन्द
र्पस्य नयनद्वन्द्वस्य पुरस्तादंबुप्राहितसंभृतजीव
नानां शंबरारिध्वजाम्बरैकदेशविलंबिनां शफराणां
स्मरणमपि नसांप्रतम्। निजगर्भप्रदेशप्रवेशितानां
कुशेशयानामुपरि कोपाभिनिवेशमुपनिनीषुः
चरणयोः सदेशादेशमुपगन्तुमिवप्रकाशितायः
तिरजनिकेशपाशः किंबहुना -

आरभ्य जन्मदिनमंबुजसंभवोयत्
अभ्यस्तवानखिलयौवतसर्गशिल्पम्।
प्रादर्शिन्निह मृगीदृशीह समस्तलोक
प्रख्यापनाय तदिदं कलितं चिराय॥

इति पुनः पुनः इन्दुवदनायाः सौन्दर्यलहरीमवगा
हमानोप्यविरहितविरहमहोष्माहर्पीति विदूषका
गमनमनन्यकार्यः प्रत्यपालयत्

तदनु विदूषकः समागत्य शयनगृहबहिर्द्वार

वर्ति पार्थिव नयन स्पन्दन संज्ञा विज्ञातानुयोगः शनैरगादीत्

देव चान्द्रिकायामिव चकोरस्याभियोगः यदेषा समस्त सामन्तवसुधारमण शेखरान्तराल विशुद्धचरणारविन्दस्य दिवसकुलबान्धवकुलधुरन्धरस्य सकलमहीपुरन्दरस्य सुशीलाववाय सुलभशुभगुणावलम्बिकायाः नीहारमहीध्रस्य मेनायां हैमवती समुदितवती।

सतत विरचितानेकदानयोः असाधारण भुजापदानयोः अखिललोककृत बहुमानयोः तिरुमलराजाभिधानयोः उभययो प्रधानयोः अवरजा वरदाम्बिकाभिधाना वरवर्णिनी वर्जनीयतर विचित्रतरचरित्रा वरप्रसाधनाभिधान व्रतसाधनाय गौरीवनं नाम तपोवनमुपगतवती। तदन्तरा मूर्तिमन्तमिव कन्दर्पं भवन्तमभिवीक्ष्य तत्क्षण विसृत्वर निखिलेन्द्रियाण्यस्म

दात्मनाम्। अनन्तरमभ्यन्तरात् बहिर्गतवती भ
वति। निसर्गधीरापि निरर्गल हृदयोत्कलिका नि
रुद्ध चित्तवृत्तिः निर्वृत कलां समाप्य गौर्यास्सप
र्यामित्य — क्वगन्तव्यं क्वतिष्ठामि किंकरोमि
किमिव संप्रतं सांप्रतम् इति किमपि नजानानाव
स्येव केवलं परिसरवर्तिनीभिः सखीभिः समा
भाषमाणा शनै निजागारमगात्।

अहं तु तदन्तिकचारिणी परिचारिकां
अन्योन्य वचन भंगिभिः अभिलाषानुषंगमस्या
विश्रस्य भवने निवेदितुमागमम्।

त्वैव योग्या धरणीधरेन्द्र
गुणान्वयेनानुगुणापरस्त्री।
अनुग्रहेण प्रणयेनवास्याः
गृहाण पाणिं किमहो विलंबः॥

किमन्यदधुना

शंखोदरगला निशाकरमुखी नीलालकाकच्छपा-

कारांघ्रिमंरांकजीवनकला कुन्दाच्छ दन्तावली।
दीर्घाक्षीगणनीय सद्गुण महापद्मा मुकुन्दादरा
यत्रास्ते वरदांबिकानवनिधीन् तत्र स्थितान् मन्महे॥

इति तदीयवचनश्रवणाद्द्विगुणोपचीयमानमानसलालसः केन सह विचारयामि के पुनरुपायाः कस्यमुखादिदं साधनीयम् इति चिन्तापरतन्त्रः बहिः कदाचित् औडव षाडवादिभेद चतुरः स्वर ग्राम विशेषमूर्छनाप्रपञ्चक विपञ्चि समन्वित गानाकर्णनया कदाचिन नवनवरसै ···· नाटकनव्यकाव्य निरवद्यगद्य पद्य पद्यापाथेक विद्वत्कविजन सरसकविताप्रसंगेन कदाचन मनुमुखप्रणीत नीतिसरणि निर्णीतिपरतान्त्रे मन्त्रिवर तन्तन्यमान मन्त्रविचारेण कथंचन दिवसानतिवाहितवान्।

अथ सा पुनरागत्य भवनं अनाभाषमाणा सखीजन समवेक्षमाणा परिचारिकावर्गैः अशुश्रूषमाणा गुरुवन्दन ··· कुलदैवतमप्रणमन्ती वीणामस्पृ

पयन्ती शारिकामनुपलालयन्ती बर्हिणमनुद्वाड़यन्ती
कात्रिमपुत्रिकामसमयोजयन्ती हंसमिथुनमनध्या
पयन्ती राजकीरं विवर्जितमज्जनं सैरन्ध्रिकानु
रोधाविरत विश्लथकैश्यसम्माकरण विचार विकलस
कल परिचारिका विमुखीकृताखिल सखीजनावि
स्मृतानुव्यापारा दिक्षु निक्षिप्त . . . . क्षण
मवनीक्षितागमनमेव समुत्क्षिप्तमुखमुत्प्रेक्षमाणा
तदीयनामश्रवणकामनया दामोदर सामानि सामो
दमसकृद्वादयन्ती सदाव मम प्राणसमइति तमेवगा
यन्ती तेनसह रहसि रिरंसमाना तस्मै विश्राणित
हृदया तस्मादेव जीवितुमिच्छन्ती तस्यदास्यमेवाज
स्रमाकांक्षन्ती तस्मिन्नेव प्रातिष्ठित प्रणय सहजाव
यव सौकुमार्य . . . नर . . . . निजायुधतयाको
रकिताधिकतरकोपेनेव कुसुमचापेन साटोपमा
वेदित हृदयतापातिशया भूपालकुमारिका चेत
सि इति चिन्तां चिरन्तनीमतानीत

किमिति

····गां गृहमं बिकाया

किमर्थमारब्धमिदं व्रतं वा।

केनाक्षे लक्ष्मीकृत एष भूपः

किमर्थमासक्तमिदं मनो वा॥

क्व वा स महानुभावः कुलंकषगुणानुरूप····शी

लः क्षोणीपालः कुत्राहमप्रवर्तित निरत्यय सुकृत

पालिका बालिका क्व वा मम तदौपयिकं शमनीय

कं कृतादृशस्य तस्य समागमाभ्युपायः सर्वथास्मिं

प्रति परपरित्राणाय शरणं अन्यं न जानामि।

एष स्थास्नुः धैर्यपादपमहो····मूलमुन्मूलयन्

न्युत्कण्ठा हृदयं वियोगदहनज्वालैः परं तन्यते।

तस्यैमे विदितास्तथापि न गताः तस्यान्तिकद्रोहिणः

प्राणा एव तथाविधाः प्रतिभटाः बाणा न मे मान्मथाः॥

व्यक्तं शीलमुपेक्षितं गुरुकुलं लज्जासमुद्भासिता

निन्द्यन्मत्सदृशां पुरश्रुतिकटु श्रोतव्यमासीद्वचः।

दोषश्च प्रकटीकृतः प्रियतमे त्वेतत्कृते शात्रवः
प्राणा एव तथाविधाप्रतिभटा बाणा न मे मान्मथाः ॥

इन्दीवराक्षीमिति चिन्तयन्तीं
सन्दीपिताङ्गीं शयने लुठन्तीम् ।
सखीसमाजः समदुःखसौख्यः
सन्तापहेतुं शनकैरपृच्छत ॥

तानि रसानुरोधमनुरुध्यमाना शालीनतया कथं कथं ...... चञ्चलनयना गौरीवने तस्य विश्रंभ रापतेः दर्शनात्प्रभृति किंचिदुदंचिदस्य । — चांचल्यमिदं वारयितुं अहं च न पारयामि समनुचित मितः परं भवतीभिरेव वारणीयं इति निश्चयमेव समुच्चरन्ती सैरन्ध्रीभिः समं सत्वरं आभिवर्तमानं सौविदल्लं समक्षं कमप्यद्राक्षीत् ।

आपृष्टस्सच प्रहृष्टमना विस्पष्टमाचष्टे समस्त भुवन लक्ष्मीसाम्राज्य लक्ष्मीस्वयंवरपतेर्नारसिंह भूपालकुमारेण अच्युतमहारायेण अत्रभवतीं प्रा

र्ययमानेन सामात्य पुरोहितमुखानुयुक्तौ तत्र भ्रातरौ
सादरान्तरङ्ग व्यञ्जक मुखप्रसाद भाङ्गिकं तथेत्यङ्गी
कृत्य तदात्वपाव प्रशस्त मुहूर्ततया प्राहिणुतां भ
वतीम् प्रसाधयितुमेतास्सपुरन्ध्रीः । तदत्र भवती
सत्वरमुद्युङ्क्ताम् प्रसाधनाय । —

इत्येतदीयैर्वचनैरनघैर्वचोभिः
अनंबुवाहामृतवर्षतुल्यैः ।
स्वरन्थः सहर्षं सहसा मृगाक्षीं
विभूष्य शश्वत् कुतुकादपश्यत् ॥ —

तदनु मेदिनीपतिः प्रमोदभरसान्द्र मान्त्रिपुरोहित
सदारवचनविहित बहुतरोत्साहैः सहजसौन्दर्य
गुणालंकरणोपि मंगलाचरण समुचित विविध अ
लंकरित शृंगारितो विस्तृत विचित्र परिशोभ प्रश
स्तजल हस्तिस्कन्धभाग सुस्थितं मणिमय भद्रासन
मध्यमध्यासीनं प्रथममहीधर विशंकट शृङ्ग पर्य
क संगतं पूर्वशार्वरी सार्वभौममनुकुर्वन् क्रमेण विमा

न्नः चर खेचरीनिकर निराकरण निपुण बहु
प्रकार शृङ्गारित स्थलस्यन्दनोपरि मञ्चकान्त
प्रवृत्त नृत्तमत्तकाशिनीजनसमुत्तेजितां अंभो
जलोचनाचरणमयूख रेखा तरंग्यमाण मौक्ति
करंगवल्लिकां वलभिरचितमणिगण प्रभापुन
रुक्त वन्दनदामाभिरामां गवाक्षान्तरगतकामिनी
कटाक्ष वीक्षामध्यां निर्धारणीयकुवलयदामसमा
जां पद्मरागमणिसद्म प्रभाबितायमान बितानां
अततितररमणीयां राजवीथीमवगाहमानो व्य
त्यस्ताभरण विन्यसनं विगलितनीवी विनिवेशकौ
शेयं वित्रस्तकोशहस्तं विवर्जितान्यकरणीयं वि
जृंभमाणोत्कलिकं विषलमान विलोचनकंपि
चकंपि जृंभितोत्कलिकं वलमानाभिः पौरविला
सिनीभिः अभितोभिलोक्यमानः विस्तारितवि
विध वस्तुजातं विरचितकुसुमोहारं विलमानवा
सनारूपं विविधालंकारविचित्रितं अतिमात्तर

मणीयं समासदत संबन्धिगृहम्
प्रविश्यतास्मिन् प्रमनानृपालः
तां राजकन्यां विधिनोपयम्य।
श्रियं पयोधेरिव शेषशायी
समानयत्तां सदनं स्वकीयम्॥

क्षोणीपतिः सहृतया न्यवसत्समस्तान्
विख्यातरागसुभगं विषयोपभोगान्।
अंभोजभाजनभृतान्यलिनील रत्ना
न्यादाय सांजलिरनोकहमञ्जरीभिः॥

निस्सीमविभ्रमरसं नृपसार्वभौम
आसेवितुं समुदभूत आधिभूऋतूनाम्॥

अथकदाचित आलवालयं आदिमरसांकुराणां
अभिनवविलासोपदेशिकः हरिणलोचनानाम् आ
भिरूप्यकरणं कमलभूः अनोकहानाम् अक्षराभ्या
सवासरं अलिकुमाराणां उत्सवदिवसः पुष्पल
तिकावनितानाम् आलोकनिदाघः प्रचुरराग

परागाणाम् प्रसूतिमासः पवनपृथुकानाम् कुड्नाधनागमो मकरन्दवाहिनीनाम् आह्नोपुरुषिकारंभः शांबरशासनस्य प्रपाञ्चित सकल जगदुल्लासः मधुमासः प्रादुरासीत्

चिरकाल विरहमसहमानेनेव स्वयम् पितानिमानमवलंबमानेन मलयपवमानेन समालिंग्यमाना लतिकांगना व्याधूतपलाशशाशायो व्यजहुरिव विरहपाण्डिमानं आभिनवपत्रालेषु चैत्रसमयलेखनेन परिलिखता इव परिसर किसलयग्रहयालु कोकिलकालिमालिकांचनशाबलिता वकुलमुकुलवर्णावलीरवलोकयन् निरंतरं तन्तन्यमान झंकारनिनद प्रपञ्चापदेनैव चञ्चरीकसञ्चयः व्यञ्जयतिस्म।—

पञ्चशार निगमपठनपरिपाठीं सन्तत मलयनटान्तरचन्दनामोद मोदस्विनी समीरण तरुणे मन्दमन्दमुपवन समीरसीम नितरलयति

मञ्जु मञ्जरीकुचासंग मधुकरमालिकोत्तरासंगम
अंकुरितमकरन्द घर्मबिन्दु सन्दोहमवलंबितकंप
संबन्धं माधवीलतामालिकया कुसुमपरागव्या
जादराजन्त परिसरविटप प्रवाल दीपिकोपरि वि
तीर्ण परिशीर्ण चूर्णमुष्टयः। —

आकुंचिताग्रमभिराम दलानुबन्ध
आरामसीम्नि नवकिंशुकमञ्चतिस्म।
पान्था घनाघन पयोधर शैलशृंग
संघट्टनादत नुशस्त्र मिवातिकुण्ठम् ॥ —

उच्चैरुन्नमिताग्रमल्प विनतं पक्षद्वयं बन्धुरं
बिभ्राणो रसिको विभान्मधुकरो यद्धर्मं शौरुषः।
नित्यं पालयिता द्विपात्रितमहो शृंगारबीजं निजं
तत्प्रायः सरसालबालवलये पुष्पेषुणारोपितम् ॥

अभंगुरमधुकर झंकार रववादजात पाटवाः तरुणोप
वन भवनेषु समुल्लासित पल्लव पटल प्रकटित परस्प
रानुराग भरितानां लतातरुमिथुनानां परस्पर प्रे

षणकलितायत ······ वाताद्धुताइव समदृश्यन्तम धुव्रतवाताः।

आलंब्य कोरकित कोमलचूतयष्टि
राखाद्य केलि सरसां सरस्सांबुपूरम्।
सर्वत्र सौरभभरं विधृतं विकीर्य
श्रान्तिं किलापनयाते ······ स्समीरः॥

सतत परिचित शातोदरी चरणाघात कौतुकान्तराय चिन्ताकुलतया निरन्तर जागरादेव नितान्तरक्तेषु कुसुमनयनेषु निभृत मधुकरकनीनिकारीपी ········ मधुर सबाष्पधारा धीरतयान्तः प्रतिनिवारित शोकाइव रक्ताशोकाः पान्थिकं लोकानाकुलयन् कन्दलदमन्द सौहृदोत्कंठानां चिरपरिगृहीत ······ कृतमौनव्रतं उद्यापयितुमुद्यते मधुसमय सार्वभौमं मलयगिरिजात मारुत पुरोहितेन आमन्त्रित षट्चरण द्विज प्रजामुखेषु निक्षिप्ताद्रिद्राक्षताइवालक्ष्यन्त कि ········ सरकुसुम

केसराः। अथ मलयगिरिसंचार संक्रान्त चन्दन
शैत्यासहतयेव प्रज्वालित मदनानलेषु मन्दानिले
षु कपिश पराग कांचन भासित शैबथयेव समुपार्जित
कान्तिसन्तानेषु चंपक प्रसूनेषु रतिकन्दर्प कल्याण
कौतुकेनेवावतंसित किसलयेषु द्राक्षावलयेषु सरसिज
मकरन्देषु जं बालसंचरण खञ्जेषु चटुलचरण कुञ्जे
षु किसलयग्रसन तुन्द परिमृजेषु कोकिलव्रजेषु सखि
कारहृदय पुनस्समाधान सावधानेषु तपोधनेषु परि
चित तिरस्कारिणी विद्या विहारेषु नीहारेषु कदा
चिदुद्यानपालिका समागम रभस तरलेन कुरलेन
मधुकरकलभावतरण परिमललहरी समुल्लासि
तेन विश्वासितेन मन्दगन्धवह कन्दल वदनकम
ल विसृमरेण निदाघ बिन्दु निकरेण मकरन्दस्य
न्दकणिकोद्गमं नितान्त परिश्रान्ति योगेन मध्य
भागेन जातिकुसुमशून्यतां सन्यानवर्ष संघर्ष
शीर्णेन कुचतट कुंकुम चूर्णेन कुसुमपराग परि

जृंभणं निरुपमारुणिमधारिणेन चरणेन पल्लवल्लजो दांचितं सूचयन्तीव समर्पितं विविधकुसुममय पारिश्रिक यो पायनासविनयान्निव निवेदितवती देवसमाकर्ण्यताम्

वरवर्णनी संचय पर्याय पक्ष धारनिखिललोचन भागधेय भदीय रूपधेय साम्न्तो वसन्तोवतीर्य विहारोपवने समुन्नायितमधुरमालिकाभ्रूवल्लरीकिस्तावक समागमनानुग्रहमिव निर्निमेषस्थलनीरजेक्षण: प्रतीक्षते ।

प्रत्यग्रपूगकुड्मलीकलिकाक्षतानां
बृन्देनकोकिलशिशुं भृशमर्चयन्ती।
देवत्वदागममहोत्सवलिप्सयासौ
प्रायश्शकुन्तशकुनप्रवणा वनश्री: ॥
अन्तर्विलासोपवनं चरन्तं
वसन्तमालोक्य वनान्तलक्ष्मी: ।
भवन्तमायान्तमवेक्ष्य मौलौ.

धत्तेञ्जलिं कोरककैतवेन ॥

मधुव्रतापादितमन्थुरे स्वा
स्पन्दा मधुश्रीरधुना विभाति ।
त्वदागमानन्द विशेषशंसी
भुजा पारे पुंगामिवोद्वहन्ती ॥

तदिदमाकर्ण्य कर्णरसायनं वचनमवनीपतिः आनन्द परतन्त्रः यथोचित पारितोषिक परितोषित हृदयां अवनतमौलिकां आरामपालिकां अनुपदमेवागते - - - - - रागतो विसृज्य माणिथवनीकिंकणात् परिचारिकासमर्पित कण्ठावलंबिनो निरगात् । तिलकतरु, विलोकनायेव वनीहरणप्रमोद विस्फारितलोचनाभिः प्रियापुत्रलिकाकन्दलकारणगानानुकूलश्रुति सहायोपेक्षयेव मृगमदालेपपरिमलकारितं मधुकराभिः चंपकदलिकाकदंबक संपादनायेव कुंकुमपत्रवल्ली समुल्लसित मुखरागाभिः सहकारतरुकुसुम वितरणायेव

पाणिकमलबद्धकंकणाभिः नमेरुकुसुमविकासैव विस्मरनासामौक्तिक विमलकान्तिमिषेणदर्शितदरहसित परस्थान विधाभिः वञ्जुलतरुमञ्जरी समर्पणायैव चरणाञ्चल समन्वित मञ्जीरमाणिक्य महःकालिकाभिः कुरबकालिंगन तरलतयैव गमनवशेन कंपितकुचकुंभाभिः वकुलमुकुलोद्भेद निदान मधुसंग्रह प्रयत्नेनेव नासाचंपकसन्नासित केलिकमलकुहर ····· मपाभिः कर्णिकारकुसुम संचयसंजीवनायैव व्यंजित व्यंजितान्योन्य वचनमाधुर्य सुधाभिः अभिमत सिन्धुवार समागम चापलेनेव त्वरित गतागत पयोधरभारश्रमनिःश्वसिताभिः शंबरशासन विजयपताकाभिरिव संचारिणीभिः मोहनशक्तिभिरिव मूर्तिमतीभिः संकेतशालाभिरिव शृङ्गारदेवतानां आभूषिकाभिरिव सौभाग्यमणीनां मधुरालापविजितशारिकाभिः परिचारिकाभिः विहितसा

रस्येव लास्य भवनमिव लतिकानाम् गीतशालामिव षट्पदानां संचरणांकणमिव समीरकिशोरकाणां गुणिकानिकायमिव कोकिलानां तरुणतरुलता भिराममारामममयासीत्

समेत्यतं सागरमेखलानीं इन्द्रो
व्यराजि राजीव विलोचनेव
सोयं वसन्तो वनदेवताभिः
स्वयं वपुष्मानिव संचरिष्णुः ॥

...... पीयोधरहरं वलदुत्तरीयं
शिंजानकांचि शिथिलालक सन्निवेशम् ।
कौतूहलादुपनमत्कुसुमापचाय
मातन्वतोन्तरलहारमलीकमध्यम् ॥

अभिनवकुसुममपचय ...... युवतीनां अभवन्नु पवनविहारानुरूपा परस्परमालापा ...... श्या लिबालप्रसवं स्वकीयमादातुकामां भवतीमवेक्ष्य
इयं लतापल्लवलल्लजान्तं

निरीक्ष्यकुक्षाव ······ तीव।

आरामकामास्त्र निकेतनेस्मिन्

अस्मासु सर्वाद्‌ध हारिणीषु ॥

चूतांकुरं तस्य पिकाः पिकास्त्रं

चंचौ निधायेव समुच्चलन्ति।

अयि निशामय विशालाक्षि परिचलदलि ···परिषद्
पांग विन्यासे पश्यति पुन्नागे लज्जयेव कुसुमभरेण
नम्रीभवति नवमालिका सुतनु मापचिनु कुसुमानि
इमानि साभिलाषमुपलालितायाः यदस्या लतिका
याः पुरतएव पञ्चशरमेतावता उपहारयता प्रार्थिता
नि प्राथमिकानि।

अयि तव नितंबकुचकुंभस्याभिवृद्धि
संपादितोपि परिजृंभतां यद्भरातिशय निर्भराकुं
चितायां त्वयि चरणांचलाधारतया निक्षेपिता
नि मया निरुपमानि कुसुमानि

अविरत मकरन्द स्यन्द जंबालितेव-

.... कलयपदकमलम्।

..........पदि मदिराक्षि किं सहेते

.... कुचाचलसदृप्रेक्षणम् ॥

अयि कलकण्ठितिलके किलकेन निमित्तेन निपात्यते न त्वया दृष्टिः किमु तव तरुविटपमञ्जरीकरन्द निष्पन्दैः अविमृष्टं मृगमद तिलकमस्तीति अप्रियतमाल पल्लवमपि न किं प्रार्थ्यते हृदयाय ... ते किमु कुशलं कपोलकुंकुम तमालपत्रमिति।

पावं विधैर्नर्मवचो विलासैः सखीजनस्य श्रवणातिथेयैः अज्ञातपुष्पापचय प्रयासादेवी तदाक्रमगतैरचारीत्।

कलनितदमणिवलयमनोहारिणा पाणिकिसलयेन विस्मरसौरभ भराधिवासित दिशावकाशानि निवासकुसुमान्यपचेतुं अभिलषन्त्याः कस्याश्चित् श्रान्ततया मक्षणान्तरालकरणाय समुदञ्चयाञ्चिवचञ्चलेन गरुदञ्चलेन किञ्जल्क परागपुंजमदसीय

पतनकातरतया मुकुलीमानमुपजग्मुषी निजपरि
थव पुषि कंजलमलिनवपुषि चक्षुषि प्रकटित झंका
र हूंकारमुच्चलतिस्म कश्चन षट्चरणतरुणः।

निजबन्धुतया नवं प्रवालं
परिरब्धुं किल पाणिरुद्यतोस्याः।
कुसुमस्तबकं कुचस्तथैव
स्वयमप्युन्नमतिस्म किं सुदत्याः॥

कस्याश्चिदासाद्य करान्तरालं
गलत्कलालिस्वनगर्ववादः।
नवप्रवाला नखकान्तियोगा
प्रपद्य लक्ष्मा ··· पाण्डरोभूत॥

कयाचन कुचजघनभरस्तांथितारंभसंभ्रमया निज
मनासिकृत सुमनोरक्षेण पुनस्सारान्ते कापि कुसुमचा
पचरणोपरि दत्तशपथापि प्रसभेन तत्प्रसूनमवचिन्व
ती व्याधुत विलुलितस्य मधुव्रतस्य सतत मधुरसास्वा
द सौहित्य विशचेतामरुचिमधर सुधामधुरीभिर

पनोदयन्ती समासदन्नादृशा निजोद्धृतमुक्ताफलम्
कस्याश्चिदाकुंचितकमुक्तशाखः
तरुः प्रसूनान्यवतीर्य पूर्वम्।
ववर्ष पश्चादिव सानुतापः
तीव्रानुरागं हितनोत्युपेक्षा॥—
अतनु निगमपरमरहस्यविदपरैरपि सुदृशां गणैः
आशुकेलिकानिकायः सहकारानोकहः तदीयक
रतामरससंगोत्संगितकुसुमैश्चर्य विचित्रतया पात्रवि
शेषस्पर्शेन महिमानमिवाविदितवान्।—
संप्रत्यहं सुतनु पुष्पवतीति वात
व्याधूतपल्लवकरोचितचेष्टितेन।
मामास्पृशेति सहसैव निवारयन्ती
वासान्तिकामल्लिभियोपगतानतानीत॥—
मरुत्किशोरेण विकीर्यमाणैः
मरन्दपूरैर्महितैश्च पुष्पैः।
कृतोपहारेषु लतागृहेषु

अंभोरुहाणामपसारयन्ती ॥

अंभोरुहाणामपसारयन्ती
शोभाममूनीह सरोजबन्धुः ।
करैः करोतिस्मरुषैव तीव्रैः
कान्तानि कान्तानन पङ्कजानि ॥
स्थितां पुरस्तादतिदूरएव
क्रमेणच स्वस्यवशं प्रपन्नम् ।
बोढा नवोढामिव सानुराग
मायातरुः क्रोडगतानतानीत ॥
आक्रामता स्वामपिवारिसीमां
उष्णेन रोधोन्तरमूर्छितेन ।
कृत्वाथ कष्टादपि हीनसान्धिं
शीतं बतालंबित कीर्तिमेव ॥

अथ विविध कुसुमकेसरसुरभिकेशपाशं अलघु निदाघसलिलासिक्तनिटिलतलसकचूर्णकलं अभिनवपरागपतनजनितनयनकोण शोणि

णिमोन्मेषमाविष्कृतचतुरवचनतान विमनाद
र विन्यास विस्रं समान सव्यानम्म अलसगमनवशा
त् अनतिशिञ्जानचरणमंजीरं अवारित परस्प
रकलहं पद कुचयुगलान्तरकान्तकेसरकुसुम
मालिकं विरत निश्वसिताभर घर्मजल पंकिलकुं
कुमानुलेपमवनीपुरन्दरान्तःपुरनितंबिनी
कदंबमंबुविहारलालसमानसं आसदत् ॥—
केलीसरः परिसरं तादृशां मृगदृशां समागमं सं
भृतोत्तरलया सरःश्रिया प्रेक्षणाय बहुशो व्यरा
जिषुः प्रेरिताः परिजना इवोर्मयः आसाद्य
निरतिशाय निदाघ निस्सहतयावगाढमिव कू
पीट संभवमंभसि प्रतिबिंबित तटविटपि पल्लव
निवहमावहन्तं कृत्तिवसनमूर्त्यन्तरस्य निजा
सो विजृंभमाणतरतरंग संघातैः अंगकलित भु
जंग पुंगवहार शंकामंकुरयन्तं कुलंकषवि
लोकवन प्रभा विभावया जलदेवता तरंगकरसं

घटितकंकणायहरणलंपटपवमान पाटच्चर
सुरंभायमाणमीन विवर्तनार्तिवर्त्तवलयं शीतक
जलाभिलाष निपतदातपताप तृषित शारदभ्र
खण्डमिव किंचपाण्डुर पुण्डरीकवनं दधानं रि
रिंसुकलहंस सद्वृतासितकमलिनीकं उल्लास
दूर्मि हिन्दोलन चतुर चक्रवाक सन्दोहं इन्दीवर
लोचनाजनःकासारम् आसादितवान्।

निरन्तरेन्दिन्दिरा सन्दोह झंकार सीत्का
र समुदंचित बालमुकुलमिषेण संकुचितपाणिः
अधिगतकण्टकश्रेणिः अंबुजनीपरिषदंबुरी
त्य भारेणेव समीरणवशेन समालंबितकंपम्
अनन्तरं अनुपमाणि मेखलाकलाप दृढनियमित
नीवीवसनाः सरभसमितेतर सन्दानितवेणीस
न्तानाः करकमलतलकलित कनक भृंगाः

मकरन्दरसपूरित लाक्षाकरण्डमण्डलाः
प्रमदवनविहरणानीत मृदुलस्तबक किसलयोप

करणाः समुद्द्योतमान जलयन्त्र नालीपालीक
नालीकलोचनाः सलिलकेलिं समारभत।

सोपानवीथीषु हरिन्मणीनां
सर्वत्र शैवालितमंशुजालैः।
सरोविभाव्य स्वस्वस्वभाव
मार्गाकुलापत्रयतिस्म काचित्॥

अपरा शिशिरपयसि ललितसंचारा कांचिदाकि
चनोदरीं कराञ्चलतरलीकृतेन लहरीभरेण
सोपानपथादवतरन्तीं अभिकिरन्ती तदीय
कुचास्फालनरभसपरावृत्तेन तेनैव सन्ताडिता
तदा निजाविनीतिफलं नियतमनुभूतवती।

विकीर्य पाथो वदनारविन्दे
कस्यांचिदन्तःकृतमज्जनायाम्।
तद्वक्त्रबुध्या कमले पयोन्या
क्षिपत्प्रतीकारविधित्सयैव॥

कुंचशैलसीम्नि देव्याः।

कीर्णं विमलाम्बु मेदिनीन्द्रेण।
झर्जरितं परमाणुवत्
अवहत तद्वदनं चान्द्रिकारूपम् ॥
मुहुस्सरोवारिषु केलिलोला
चरन्ती
निमज्जनोन्मज्जनभावहन्ती।
बलाहकान्तः परिदृश्यमाना
सौदामिनीवाजनि चंचलाक्षी ॥

अन ‥ – ‥ तेषु कुरंगनयनाशमं रागेषु पुनरपां
गरागान् क्षालितेषु दशानवसनरंजनेषु परि
हृतवसनां घुसृणरसरंजनां निपतितासरसि
सरकालिकासु तनुषवल्लरीपुलककलिकां नि
र्मृष्टैषु निदाघबिन्दुनिकरेषु कासारशीकरप्र
करानपि संघट्टयन् प्राचीयितश्रियं प्रपञ्चय
तिस्म।

विस्मनीयप्रकारो वारिविहारः स्मिताथो
रुदुकूल संसिक्तव्यक्त संदृश्यमान प्रभाभासुर

बन्धुरैरुफ्गल निगलित विरलदलपंक मिलित
मेदुरकदलीकाण्डकान्तिसंपदः संकुचितश्र
साध्रि संख्यानौन्नामि फुल्लककुचकलशघ
टित स्वस्तिक नितंब बिंबलंबमान वेणीनिष्य
न्दामन्दबिन्दवः शिशिरसीत्कारकम्पितबि
म्बाधरा नितम्बिनी जनाः पुरः पुरः सद्धकि
संघातानुगामिन्य निशाक्रमन्नुपवन सरसा
सखीजनकृतस्परस्याः ।

निर्गत्य तस्मात्सरसोऽरमण्यः
प्रसाधिताङ्ग्यः परिकर्मभेदैः ।
अमन्दलीला विमलांबुमुक्ताः
सरःश्रियः तीरगताइवासन् ॥

समं मृगाक्ष्याः सरसी विहारं
समाचरन्तं नृपतिः समीक्ष्य ।
स्वयं प्रतीच्यापि विहारकांक्षी
स्वरांशुरागादपरांशु बिंबम् ॥

छाया प्रवासचलितेनादिवाकरेण
साकं स्वयं च परतः परतः समेत्य।
प्राचीगृहं प्रतिनिवृत्य पयौ प्रसृष्टां
मध्ये पथं स्थितवतेव दृढोपगूढा॥ —

पथिकोऽश्वकोरैराकर्षणादिव छायास्पं मृश
मायामवनीषु, पाणिग्राह तिमिरानीक धाटी
विलोकनायेव समारूढ शिखरिशृंगेषु, प्रद्यो
तन किरणौघेषु, समदिरेक्षणावदनपंकजे
षु, कमल विकासन सर्वस्व संगोपनायेव प्रविष्टप्र
साद पश्चिम गवाक्षमार्गेषु, भार्गव निर्गल तपःफल
वितरणायेव चरमागिरि शिखर प्रवातान् प्रसाद
शाली किरणमाली —

अपरगिरितरि तरक्षोरातपच्छायलेशः
हरित मलिनवर्णैः अंचितस्यांशुमाली।
कबलित दिनधेनोः कण्ठरक्तेन रक्तं
विसृमर निजपादैः श्मश्रुलं प्रोथमासीत्॥ —

.... दातपरखण्डा:

केसरा इव कराश्च विकीर्णाः ।

कर्णिकेव समलक्ष्यत बिंबं

प्रावृड ंबु जगते रहिमांशोः ॥—

चटुल नटन विजृंभमाणार्धनारीश्वर दक्षिणेतर चरणकंजरंजनाय किंचिदाच्छिन्नकोणां वर्तु लालक्तक वर्तिकामनुवर्तमाना चरमजलधिचला चल वीची भस्त्रिका चुंबिनार्धभागेन कामकाण्डीर काण्डकरणकृतोपक्रमकाल कारुकसन्दीपित हसन्तीमुखमपहसन्तीं मन्दं मन्दं अपादिक कुहरकूपमवागाहत —

अरविन्दबन्धु कुरुविन्द पिधाने

चपलेन कालशशिना व्यपनीते ।

घुसृणं वियन्मधवनीलकरण्डा-

द्गलितं यथा घनमदृश्यत सन्ध्या ॥—

सागरोदरशयस्य मुरारेः कन्दुकीव विलसत्करदण्डः ।

इन्दिरां कुमाणिरं कुजगेहा-
दास्मनीव सहृन्नयनैषीत् ॥

त्रिभगत्रयोत्सवं विधातुं
स्मरदेवस्य समुद्यतः प्रदोषः ।
स्फुदिन्दुकरान्तरापदेशा
हृदयस्तंभमलंभयत्पताकाम् ॥

अतिवेलमनादृताद्विरेफाः
कमलीमुकलीकृताब्जमुख्याः ।
प्रतिकारधिया भजन्कलंकं
व्यपदेशात्तमित्रामिन्दुबिंबम् ॥

वेलातिपातेन पयःपयोधि
ज्योत्स्ना समृद्धः सुतरां विजित्य ।
अपुपुरत्तैत्र शशांकशंखं
प्राप्तश्च ताराध्वनपुष्पवृष्टिम् ॥

पुष्पेषोः जयसंपदं निरुपयां पाणौ गृहीतुं मुदा
निर्यातस्य शशांकमण्डलमसद्भृंगारकाबर्जिता ।

पादक्षालननव्यदुग्धलहरी प्राचुर्यतो वेलया

सर्वत्र प्रकटीकृता कुवलये चन्द्रातपश्चन्द्रमा

ततः क्रमेण समेधमानामोद कुमुदिनीवन मधुरसास्वादन वैवश्य विश्लथ पक्षानिष्पन्द मुक्तेषु मधुकरानीकेषु शार्वरीरमण किरणाञ्चल पर्वचर्वणनिर्वृति समुदञ्चित चञ्चुविकारेषु चकोरेषु समुन्नत चन्द्रकान्त सौधजाल प्रणालिकान्तरकन्दलदमल सलिल सन्दोहानुकारिषु चन्द्रिका सराजिषु नरपालकलोक यामिस्तबै रमकुं थान्तर शायितरुणेषु विरचित विविधोपचार संविधानं विहार सदनमासाद्य पुरन्दरइव पुलोमजया वरदाम्बिकया सह वसुन्धरापति सन्दर्श ....

...... मिथः प्रणयरसोपहारा

विदित दिवसक्षपात्ययापायाः।

अनुपमसान्द्र परस्परानुरागान्

कतिचिन दिवसानसावनैषीत्॥

समममन्वनया साचिवावध्यार्यकार्यान्

कालाद्वहोर्वसुमतीकयितुर्मृगाक्षी ॥

श्रीवेंकटाद्रिपतिसेवन पुण्यपाकैः

चन्द्रान्वयाभ्युदयहेतुमधत्त गर्भम् ॥

आनन्दकन्दलममेयमिवात्मविद्या ॥

उत्पलदृशो गर्भवर्तिनः चक्रवर्तिनः कुमारं आसमुद्र सत्व गुणोन्मेष विशेषेणेव शनैः पाण्डिमानम् पुषतवपुरखिलम् ॥

कुमारोदयकुशल सूचन तमालदल शोखरित मुखशालकुंभ संभावनां कुशेशय दृश मेचक चूचुकौ ॥ इन्दिरासरस्वत्योः पुरस्तादेव सुमत्या भर्त्रा समैवाययिति गर्भगतं सुतं प्रतिविस्तारिता हस्तवल्लरीव रोमावलिरराजीत् ॥

अमृतरसातिशायिभिरर्भकगुणा .....

..... प्लावितेव वस्तुषु नकेषुचिदवहृदयिलाषम् ।

आपन्नसत्वामवगत्य धात्री-

मुखान्मृगाक्षीं मुदितः क्षितीशः।
अत ····· भ्युदयाय कर्मा
ण्यन्वक्रमात्पुंसवनादिकानि ॥
अंशुमालिनमिवादिमादिशा
दुग्धसिन्धुलहरीव कौस्तुभम्।
वासरेव रमुहूर्तशालिनि
प्रासवीच्छवरदांबिकासुतम् ॥

कुमारसमुदयसमय समुदयदमेयामोदो मेदिनीपतिः। आकलितानेकविध महोत्साह विशेष विधिः ईप्सितातिशायी विश्राणित विहृति विमोचित वसुमती खेचर याचकभावः निर्माय जातकर्मादीन् निरवधिकं उन्मनाः तमात्मजन्मानमवलोक्य सफल जन्मानममन्यतात्मानम्

श्रीवेंकटाद्रीशवरप्रसादात्
जातं कुमारं जगतीसुधीशः।
अमुं हरेरंशभवं विदित्वा-

नाम्नाऽव्यतानीत् चिनवेंकटाद्रिम् ।

भुवि भुवान्तर संचरणेन
भुवनचक्र समीपक्रमम् ॥

अनवरतघटित दृढ मुष्टितया
समाश्रितत्राणदृढमुष्टिताम् ।

अनिदानहासितकाणिकाग्नि: अतीतवसुमतीपतीनां अपहसनम् । अत्यन्तारुण चरणपाणि किसलयं अपगतधरणीरमण परित्राणानुयोग राग गं ~~स्मर्ण~~ क्रीडन समय विकीर्ण पांसुतया नैकविधानीक पराग योगेन निखिल लोक जयोद्योगमपि विद्योतयन् ...... कणत्कृत रिंकमणतया प्रतीप भूमिपाल मौलिभाग प्रधाण पदार्पण विक्रममिव भावयन् आनन्दपरतन्त्रं अवनीन्द्रमातनुत विरचित शौशवोचित विविधविहार: कुमार: ।

आलोकनैरमृतवर्षिभिरेष पित्रो-
राशीर्विशेषवचनैरवनीसुराणाम्।
आनन्दसन्ततिभिरप्यखिलप्रजानां
अभ्येति वृद्धिमनघः चिन्नवेंकटाद्रिः॥

अनन्तरमच्युतमहीमहेन्द्रो बाल्यभाव सम्भू-
सदसाधारणान्, भवं नारायणचरणारविन्द नि-
बद्ध भावं अत्युदारं कुमारमालोक्य साकमा-
गत्य गणेन सकल महीतल सन्त्राणधुर्यं
अवतार्य शुभं यु निदिने . . . . . शाश्वतं यु-
वराजपदस्य।

अत्यादरादच्युतदेवरायं
वरेण्यशीलां वरदांबिकां च।
श्रेयो निधिं च चिन्नवेंकटाद्रिं
श्रीवेंकटेशः चिरकालमव्यात्॥

इत्येकवाराकर्णनमात्र दृढावतारित नव्यकाव्य
. . नाटकालंकारपुराणागम रहस्यानुबन्ध स

मिन्धान स्वाभाविक प्रतिभानुभावया विद्यावि
शेष निरवद्य विद्वद्वर सकलकविकुल श्रवणा
नन्द चिन्तितानन्ताभीष्ट फलाश्रयण विश्राणन
कामगवीभवत । अशेष भाषा विषय सविशेषो
न्मेष-चतुरिम गर्भित सरसप्रबन्ध सन्दर्भनया विवि
धविद्या प्रागल्भ्य राजाधिराजाच्युतराय सार्वभौ
म प्रेम .... सर्वस्व विश्वासभुवा निरुपाधिकमहो
पकार निर्माणधर्म निर्मल हृदयया निखिललो
पि विलेखन नियत वितरणकृत हस्त हस्तारविन्द
या विरिञ्च-चञ्चल नयनाञ्चलाञ्चल सम्मुदंचित
विपञ्ची प्रपञ्चित पञ्चम मधुरिमोदञ्चन पिक
स्वरकण्ठ स्वरया विपुल तलातल विहार विनोद
साकाशावतीर्ण शतपर्णासनवरवर्णिनी मतिनि
र्णायिकया नानादेश प्रतिष्ठित .... विरचित वा
जपेय पौण्डरीक सर्वतोमुख महाध्वर द्विजवर
वितीर्यमाणाशी विशेष परिपोषित सौभाग्यया

तिरुमलाम्बया निर्मितं वरदाम्बिकापरिणयं
नाम चम्पुकाव्यं आचन्द्रतारं अभिवर्धताम्
परिसमाप्तम्

शुभमस्तु

स्वामिन्नच्युतराय भूषितमहासिंहासनं त्वामहं
नाथं प्रागचले किलैक्ष्य सहसा नन्तुं नरेन्द्रे भुवि।
विन्यस्तामृमुटाश्चकासति भवद्योरसारमायाविदः
शात्रुश्रीगल ... न्नाशयितुं सौवर्णपात्रस्ततः
चित्ते श्रीह भाक्तिमक्षिणि करुणां अंगे भुजे सुश्रमां
वक्षस्योम्निरमां वहन्नविरतं वक्त्रे च वाग्देवतां
मत्स्नेहो यमिति प्रसादनमतिर्मां नैषयत्तेतनौ
केनेत्यच्युतराय वन्तु मिवते कीर्त्ये दिगालीश्रिता।
वल्गादिक्करिवर्गकर्कशगिरोवस्थान वित्रासिनी
क्ष्वेलज्वालमिलत्फणीश्वरफणा छिरोहासहा

निर्यान्निर्झरापिच्छिलाचल निशाधाराधरासांप्राति
त्वारु ह्यासलमंसमच्युतमहा ··· यस्य त्रिभ्राम्यति।
त्वदुपकण्ठधृतं सितचामरद्वितयमच्युतरायवि
व चरिते।
तवमहोदयदानजलार्णवप्लवनकेलिजुषो यशसोऽकुरौ।



इति

- - -